Remarks—Most of the leaves are damaged. The first Fol. is numbered "मक्ष" (12). The leaves are not arranged in order.

---

## तर्कप्रकाशिका ॥

### No. 580. TARKAPRKĀŚIKA.

C. O. L. No. 1209.

Substance—Palm leaf. Size—12″ × 2″. Leaves - 88. 9—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2800. Incomplete.

Owner—Kuṭṭan Tampān, Naduvilakam, Certtala.

Subject—A commentary on the Nyāyasiddhāntamañjari of Jānakīnātha.

Beginning :

घटाकाशसंयोगस्यायोग्याकाशवृत्तित्वेनायोग्यत्वादिति भावः । नचैवं वायुस्पर्शस्य प्रत्यक्षत्वं न स्यात् । त(त्र) वायोरयोग्यत्वादित्यत आह—क्विश्चेति । लाघवात् सम्बन्धप्रत्यक्षत्वापेक्षया लाघवात् । ...लाघवमेवाह—संयोगत्वस्य जातिरूपतया लाघवमस्त्येवेति भावः ।

End :

अभिन्नकर्तृकत्वरूपे समानकर्तृकत्वे अभेदांशशक्त्यभावेऽपि त्त्वालकाराभ्यां भो(ज)नकर्तरि व्रजनकर्तुरभेदान्वयबोधसम्भवात् तयोः कृतिमात्रवाचकत्वेऽपि व्रजनपूर्वकालीनभोजनकृतिमान् व्रजनकृतिमानित्यन्वये भोजनव्रजनकृतेश्चैकाधिकरण्यस्यापि भानसम्भवात् । न च समानकर्तृकत्वस्याशक्यत्वे चैत्रो गच्छति मैत्रो भुङ्क्त इति प्रयोगः ।

... ... ... ... ...

Colophon :

इति श्रीन्यायवागीशदीक्षितश्रीकण्ठविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां प्रत्यक्षखण्डः समाप्तः

इति श्रीदीक्षितश्रीकण्ठशर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां तर्कप्रकाशिकायामुपमानपरिच्छेदः समाप्तः ।

Author—Śrī Kaṇṭha.

Remarks—Several leaves are missing in the beginning, middle, and the end. The Ms. is much damaged. The colophon reveals that the author was given an honorific title "Nyāya Vāgīśa Dīkṣita" and that the work is divided into Khaṇḍas and Paricchedas. The work is identical with No. 4223, DCSMM. Vol. VIII.

---

## ॥ तर्कभाषाप्रकाशिका ॥

No. 581. TARKABHĀṢAPRAKĀŚIKĀ.

C. O. L. No. 203.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—233, 3

19 lines per page and 16 letters per line. Script—Devanāgari. No. of Granthas—2200. Complete.

Owner—C. O.

Subject—Same as No. 578 A.

Beginning—Same as No. 857. DCSMMPL.

End :

अप्रामाण्यशङ्काशून्यज्ञानस्यैव स्वकार्यकारित्वे प्रामाण्यग्रहस्याप्रयोजकत्वादित्याभिप्रायेण सिद्धमुपसंहरति—अत इति । परतः-शब्दार्थमाह—न ज्ञानग्राहकेणेति । अप्रामाण्यग्राहकेण यावता ज्ञानग्राहकेणेत्यर्थः । परिच्छेदार्थान् सङ्कलय्याह— चत्वार्येवेति ।

सेयं मानपरिच्छेदे हन्त भावप्रकाशिका ।
आनन्दयन्ती सततं तेन तुष्यतु माधवः ॥

Colophon :

इति सोमसुतकुलसमुद्भूतमहोपाध्यायभवनाथकुमारसुतगोपिनाथविरचितायां तर्कभाषाप्रकाशिकायां प्रमाणपरिच्छेदः समाप्तः ।

Author—Gopīnātha, son of Bhavanātha Kumāra.

Remarks—The work extends up to Pramāṇaparīccheda. The closing verse proves that the commentary is entitled Bhāvaprakāśikā. The work is noticed under No. 4122, DCSMM. Vol. VIII. Gopinātha may be identified with the author of Maṇisāra who flourished in the 16th century A. D.

## ॥ तर्कभाषाव्याख्या (भावार्थदीपिका) ॥

No. 582. TARKABHĀṢĀVYĀKHYĀ.
Bhāvārthadīpikā.

C. O. L. No. 951.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—94. 7—14 lines per page and 36 letters per line. Script — Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Nārāyaṇan Nārāyaṇan Iḷayatu, Vembanāṭṭillam.

Subject—Same as No. 578 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ओंतत्सदेभिः प्रतिपादिताय
नित्याखिलेशाकृतिधीयुताय ।
लीलासमुल्लासिकलेबराय
नमोऽस्तु तस्मै जगदीश्वराय ॥

उज्ज्वला तर्कभाषाया इयं भावार्थदीपिका ।
भट्टाचार्येण धीरेण गौरीकान्तेन तन्यते ॥

मातर्भारति हे शिरोमणिवचोव्याख्यानसत्कौशलैः
साहङ्कारतयैव केशवकृतिव्याख्यासु किं लज्जसे ।
कर्पूरप्रचुरोल्लसत्खदिरयुक्ताम्बूलजो वाधरे
रागो यावकजोऽथवा यदि कदा का नाम शोभाक्षतिः ॥

इह खलु प्रेक्षावन्तो ग्रन्थाभिधेयप्रयोजनसम्बन्धान् प्रतीत्यैव तदध्ययनादौ प्रवर्तन्ते । तदुक्तम्---

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"

End:

रात्रिभोजने तदानीमिन्द्रियसान्निकर्षाभावान्न प्रत्यक्षविषयता । पीनत्वानुपपत्तेः ज्ञानरूपायाः रात्रिभोजनाव्याप्यतया देवदत्ते पक्षे अवृत्तित्वाच्च नानुमानविषयता । शब्दाभावादेव न शब्दबोधविषयता। उपमितेः प्रसक्तिरेव नास्तीति बोध्यम् । एतेनार्थापत्तेः प्रत्यक्षादिभिन्नत्वे साध्ये रात्रिभोजनस्य प्रत्यक्षाद्यविषयित्वं पक्षावृत्तिहेतुः । ईश्वरादिप्रत्यक्षसन्निहिततत्पुरुषान्तरप्रत्यक्षादिविषयत्वात् । रात्रिभोजनेऽपीदमसिद्धम् । हेतोरुभयवा... ... ... ... ...

Colophon:

इति प्रत्यक्षपरीक्षा ।

Author—Gaurīkānta Bhaṭṭācārya.

Remarks—This is identical with No. 4134, DC-SMM. Vol. VIII. Gaurīkānta Bhaṭṭācārya was a native of N. Bengal who flourished towards the close of the 16th or the beginning of the 17th century.

---

## ॥ तर्कभाषाव्याख्या (भावार्थदीपिका) ॥

No. 583. TARKABHĀṢĀVYĀKHYĀ.
Bhāvārthadīpikā.

C. O. L. No. 196.

Substance—Paper. Size—13″ × 8″. Pages—559.

14—15 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—4400.

Owner—C. O.

Subject—Same as No. 578 A.

Beginning—Same as No. 582.

End :

अत्रोपाधेयस्यासिद्धविरुद्धत्वादेरुभयरूपत्वेऽप्यसिद्धत्वविरुद्धत्वाद्युपाधीनां ज्ञानस्यानुमितिविरोधितया पृथग् दूषणत्वं, यथा पातकिनोऽप्येकत्वे पातकानां ब्रह्मवधादीनां भिन्नत्वं तद्वदित्यभिप्रायवानाह—यथा न सांकर्या ... ... ...

Colophon :

Author—Remarks : Same as No. 582.

---

## ॥ तर्कभाषाव्याख्याव्याख्या ॥

## No. 584. TARKABHĀṢĀVYĀKHYĀVYĀKHYĀ.

C. O. L. No. 198.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—310. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3800.

Owner—C. O.

Subject—Explication of the Bhāvārthadīpikā of Gaurīkānta Bhaṭṭācārya, a commentary on the Tarkabhāṣā.

Beginning:

नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थयिष्यामि विद्यादानं तु देहि मे ॥

गौरीकान्तकृतिः स्वतो विशद...नाथ्रातदोषाप्यसौ।
बालानां हृदयं न रञ्जयति यत् प्रौढस्य चेतो यथा ।
तद्दोषाय भवत्यतः प्रकटयन् भावं विचार्यानया
कुर्वे केशवभावनानुगतया बालप्र... ...म् ॥

चिकीर्षितस्य ग्रन्थस्य विघ्नशान्त्यै कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति — ओमिति । अत्र

"ओंकारश्चाथशब्दश्च द्वाविमौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकाविमौ ॥"
इति शिक्षावचनेनोङ्कारप्रयोगस्य प्रत्येकं मङ्गलत्वात् ।

End:

चाक्षुषेति । तमश्चाक्षुषे चाक्षुषत्वस्य नीलं तम इति नीलत्वसामान्यप्रत्यासत्तिजालौकिकरूपचाक्षुषे द्रव्यसमवेतविषयकचाक्षुषत्वस्य घटादिमात्रविषयकलौकिके चाक्षुषे द्रव्यविषयकलौकिकचाक्षुषत्वस्य रूपत्वादिमात्रविषयकनिर्विकल्पके समवेतविषयकलौकिकचाक्षुषत्वस्यातिप्रसक्ततया द्रव्यसमवेतविषयकलौकिकचाक्षुषत्वं कार्यतावच्छेदकमित्युक्तं रूपादिका

Colophon:

Author:

Remarks—The author's panegyric of the Goddess at Kashmir shows that he was a Kashmirian by birth.

---

## ॥ तर्कसंग्रहटिप्पणी ॥

## No. 585. TARKASANGRAHATIPPANI.

C. O. L. No. 2309.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{5}{8}''$. Leaves—31. 9 lines per page and 36 letters per line. Script—Malayālam. No. of Granthas—658. Complete.

Owner—Punartamnāl Iḷaya Tampurān, Pūñjār.

Subject—A gloss on the Tarkasaṅgraha.

Beginning:

श्री । हरिः ।

निधायेति । हृत्पदं मनःपरम् । जन्यत्वं सप्तम्यर्थः । अन्वयश्चास्य निधाने निधानं ज्ञानविशेषः । त्रिश्वेशमिति । द्वितीयार्थो विषयत्वम् । तथा च विश्वेशविषयकमनोजन्यज्ञानविशेषोत्तरकालीना या कृतिरिति केचित् । तन्न ज्ञानमात्रस्य मनोजन्यत्वेन मनोजन्यत्वार्थकस्य हृदि इत्यस्याव्यावर्तकत्वापत्तेः । किन्तु हृत्पदं हृदयरूपशरीरावयवपरम् । विधानं धात्वर्थः । तच्चावस्थापनम् अवस्थितत्वारोपणम् । तथा चावस्थितत्वप्रकारकाहार्यज्ञानोत्तरकालीना । या कृतिरित्यन्वयबोधः ।

End:

धूमपदं धूमत्वव्यापकलाक्षणिकम् । तस्य च वह्नावभेदेनान्वयः । यत्र तत्रेति तात्पर्यग्राहकम् । अथवा यत्र धूमस्तत्राग्निरिति वाक्यात् प्रथमतो धूमवह्निसामानाधिकरण्यबोधः । तदनन्तरं व्यापकत्वस्य

मानसबोधः । तावता नियतसाहचर्यस्य तादृशवाक्यात् प्रतिपाद्यत्वमित्याहुः ।

Colophon :

इति पट्टाभिरामविरचिता तर्कसंग्रहटिप्पणी समाप्ता ।

പൂഞ്ഞാററിൽ ശാസ്താവു് തുണ.

भूतनाथ सदानन्द सर्वभूतदयापर ।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः ॥

൧൦൨൯ാമാണ്ടു് കർക്കടകമാസം ൩൧-ം എഴുതിതീർന്ന ഗ്രന്ഥം അശ്വതിയും കറുത്ത അഷ്ടമിയും വ്യാഴാഴ്ചയും കൂടിയ ദിവസം എഴുതിതീർത്തതു പൂഞ്ഞാററിൽ കോയിക്കലെ ശ്രീരാമൻ.

Author—Paṭṭābhirāma.

Remarks—Herein is explained the abstruse import of the sentences in the Tarkasaṅgraha without losing sight of its coherence. The Ms. ends with the explanation of Vyāptilakṣaṇa in Anumāna.

---

## ॥ तर्कसंग्रहदीपिकाप्रकाशः ॥

## No. 586. TARKASAMGRAHADĪPIKĀPRAKĀŚA.

C. O. L. No. 2376.

Substance—Palm leaf. Size—9″ × 1″. Pages—103. 8—10 lines per page and 32 letters per line. Script—Malayalam. No. of Granthas—1850. Complete.

Owner—Kuttiraru Godaru Nambūrippād, Padutol Pālur Manakkal, Piravam, Travancore.

Subject—Explication of Tarkasaṅgrahadīpikā of Annambhaṭṭa.

Beginning:

श्रीः । हरिः । श्रीगणपतये नमः ।

अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

वन्दे गुरुं शिवं साम्बं दक्षिणामूर्त्तिमव्ययम् ।
यद्वन्दनेन मन्दोऽपि विन्देद् गुरुसमाननताम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये समाचरितं मङ्गलमीश्वरनत्यात्मकं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते—विश्वेश्वरमिति ।

Colophon:

श्रीमत्पाणोपनामकवंशपयःपारावारराकाचन्द्रायमाणपद-

वाक्यप्रमाणपारावारीणश्रीमद्राभट्टतनूजश्रीनीलकण्ठभट्टविरचि-
तस्तर्कसंग्रहदीपिकाप्रकाशः समाप्तः ॥

കൊല്ലം ൧൦൩൦-ാമാണ്ടു് മിഥുനമാസം ൮-ാം തീയതി ബുധനാഴ്ചയും അഷ്ടമിയും കൂടിയ ദിവസം തുലാം രാശികൊണ്ടു എഴുതിതീൎന്നു.

Author—Śrī Nīlakaṇṭha Bhaṭṭa.

Remarks—The author is the celebrated commentator on Maṇigrantha. The Ms. is available in print at NSPP. It is identical with No. 4167, DCSMM. Vol. VIII.

---

॥ तर्कसंग्रहदीपिकाप्रकाशः ॥

No. 587. TARKASAṄGRAHADĪPIKĀPRAKĀŚA.

C. O L. No. 97.

Substance—Paper. Size—$13\frac{1}{2}'' \times 3\frac{1}{2}''$. Pages—309. 20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—4200. Complete.

Owner—C. O.

Subject—Same as No. 586.

Beginning:

ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशिका ।

तत्र प्रारिप्सितग्रन्थविरामविरोधिविघ्नव्यूहविध्वंसनविचक्षणां विश्वनाथादिनुतिं शिष्यशिक्षार्थमादौ निबध्य शिष्यावधानाय प्रारिप्सितं प्रतिजानीते — विश्वेश्वरमित्यादिना ।

End :

इत्थं च वेदान्तशास्त्रं श्रवणोपयोगि, न्यायशास्त्रं मननोपयोगि,...शास्त्रं निदिध्यासनोपयोगि इति परम्परया त्रयाणामविशेषेण मोक्षफलकत्वं निराबाधमिति न किञ्चिदनुपपन्नमिति दीपिकाकारस्य निगूढाभिप्रायः । हरिः । ओम् ।

Colophon :

इति महोपाध्यायश्रीबालकृष्णतर्कालङ्कारभट्टाचार्यसद्गुरुप्रसादलब्धविद्याविभवश्रीमदारुरुवंशपयःपारावारराकासुधाकररायनरसिंहपण्डितकृतदीपिकाप्रकाशः सम्पूर्णः ।

श्रीगुरुभ्यो नमः ।

Author—Rāyanarasimha.

Remarks—Another work of Rāyanarasimha is the commentary on Muktāvalī. This work has been printed in the Bāla Manoramā Press, Madras. It is identical with No. 4170, DCSMM. Vol. VIII.

---

## ॥ तर्कसंग्रहवृत्तिः ॥

No. 588 A. TARKASAṄGRAHAVṚTTI.

C. O. L. No. 821 A.

Substance—Paper. Size—11½" × 8½". Pages—43.

## ॥ मुक्तावलीव्याख्या ॥

## No. 588 B. MUKTĀVALĪVYĀKHYĀ.

Substance—Paper. Size—$11\frac{1}{2}'' \times 3\frac{1}{2}''$. Pages—135. (144—178) 20 lines per page and 26 letters per line. Script—Devanāgarī. No. of Granthas—2200. Incomplete.

Owner—C. O.

Subject—A commentary on the Muktāvalī.

Beginning :

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात् ।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥

तत्र तावत् भाषापरिच्छेदव्याख्यानं चिकीर्षुर्विश्वनाथपञ्चाननः निर्विघ्नपरिसमाप्तये कृतस्य ईश्वरनिर्देशरूपमङ्गलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै ग्रन्थतो निबन्धनं कुर्वन् शिवं प्रार्थयते—चूडामणीकृतेति ।

End :

साध्यवत्ताग्रहविरोधितावच्छेदकसम्बन्धेनावृत्तित्वस्यावश्यं विव-क्षणीयत्वात् सत्ताभाववान् जात्यभावादित्यादौ अव्याप्तिः । जात्य-भावाधिकरणे साध्यवत्ताग्रहविरोधितयामकसम(?)समवायिसम्ब-न्धेन वृत्तेरप्रसिद्धेः । न च सत्तावान् जातेरित्यादौ स्वाधिकरणेत्या-दिव्यर्थविशेषणम् ।

Author—Mahādeva Bhaṭṭa.

Remarks—Only a portion of the text is extant herein and hence the absence of the colophon. This is identical with No. 3955, DCSMM. Vol. VIII

## ॥ तर्कसंग्रहव्याख्या (न्यायबोधिनी) ॥

No. 589 A. TARKASAṄGRAHAVYĀKHYĀ.
Nyāyabodhinī.

C. O. L. No. 1676 A.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—11. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—375.

Owner—Paramaśvaran Nambūri, Ṛṣi Illam.

Subject—A commentary on the Tarkasaṅgraha of Annambhaṭṭa.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—निधायेति ।

End:

अन्योन्याभावं निरूपयति—तादात्म्येति सर्वेषामपीति । प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ततन्निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्श्रेयसाधिगम इति न्यायस्यादिमसूत्रे उक्तानां प्रमाणप्रमेयादीनामित्यर्थः । विस्तरस्त्वन्यत्रानुसन्धेयः ।

Colophon:

इति श्रीसमस्तविद्वन्मकुटश्रीगोवर्धनकृता संग्रहव्याख्या न्यायबोधिनी समाप्तिमगमत् ।

शुभमस्तु ।

Remarks—The Ms. is available in print.

## ॥ तर्कसंग्रहवृत्तिः ॥

No. 589 B. TARKASANGRAHAVṚTTI.

C. O. L. No. 1676 B.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—16. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—700.

Owner—Same as No. 589 A.

Subject etc.—Same as No. 516 B.

---

## ॥ तर्कसंग्रहव्याख्या ॥

## No. 590. TARKASAṄGRAHAVYĀKHYĀ.

C. O. L. No. 2352.

Substance—Palm leaf. Size—10½"×1½". Leaves—32. 9—10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Owner—Harihara Aiyar, Nārāyaṇa Aiyar, Veccūr.

Subject—Same as No 516 B.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । सीतारामाभ्यां नमः ।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

निधायेति । हृदि विश्वेश्वरं निधाय ध्यात्वा गुरुवन्दनं कृत्वा। शिष्यशिक्षार्थं श्लोकरूपं वाचनिकं मङ्गलं ग्रन्थादौ निबध्नन् शिष्यावधानाय प्रतिज्ञां करोति—क्रियत इति । शिष्यावधानं शिष्याणां श्रोतुमिच्छा ॥ शाब्दबोधः — हृदयानिष्ठविश्वेश्वरविषयकध्यानानन्तरकालीनगुरुविषयकवन्दनविषयकनमस्कारानन्तरकालीनबालनिष्ठानायासप्रयोज्यबोधजनकः तर्कसंग्रहः मन्निष्ठकृतिविषयीभूत इति ॥

End :

अन्योन्याभावः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमन्योन्याभावस्य लक्षणम् । घटः पटो न भवति इति व्यवहारविषयः। ननु प्राचीनमते प्रमाणप्रमेयसंशयादिषोडशपदार्थानां विद्यमानत्वात् कथं सप्त पदार्था इत्याशङ्कायामाह—सर्वेषामेवेति। एवं च षोडशपदार्थानां सप्तपदार्थेषु अन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

कणानत्तीति कणादः कणादमते नवीनमते न्यायमते गौतमादिप्राचीनमते च बालानां पदार्थज्ञानसिद्ध्यर्थं वि(द्वांसिन? दुषा) अन्नंभट्टकविना तर्कसंग्रहः (क्रियते?कृत) इत्यर्थः ।

Colophon :

नवीनन्यायमतयोर्बालानां सुखबोधिका ।
पुरुषोत्तमेन रचिता संग्रहार्थप्रकाशिका ॥

हरिः । शुभमस्तु । श्रीगुरुभ्यो नमः । सीतारामाभ्यां नमः । हरिः । संग्रहार्थप्रकाशिका समाप्ता । श्रीकृष्णस्वामिने नमः । हरिः । ॐ । शुभमस्तु । हरिः ॥

Author—Puruṣottama.

Remarks—The colophon furnishes the name of the author besides that of the work as Saṅgrahārthaprakāśika.

## ॥ तर्कसंग्रहव्याख्या ॥

### No. 591. TARKASAṄGRAHAVYĀKHYĀ.

C. O. L. No 536.

Substance—Paper. Size—13½" × 8½". Pages—60. 20 lines per page and 36 letters per line. Script—Devanāgarī. No. of Granthas—600. Complete.

Owner—C. O.

Subject etc.—Same as No. 590.

---

## ॥ तर्कसारः ॥

### No. 592. TARKASĀRA.

C. O. L. No. 421.

Substance—Paper. Size—13½" × 8". Pages—243. 18 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—2700.

Owner—C. O.

Subject—Explication of the Tarkabhāṣāprakāśikā of Connibhaṭṭa.

Beginning :

... ... ... ...

विनायकगुरून् प्रणिपत्य मूर्ध्ना ।

श्रीजन्मवृद्धकृतभासुरतर्कभाषा-

भावं प्रकाशयति ... ... ॥

काक्षाङ्घ्रिवर्त्म विदुषामपि दुर्निवारं
... ...... पदानि जानन् ।
कुर्वंस्तथापि महसा ननु तर्कमार्गं
मन्तो ह्यमन्त्वयमनुग्रह.... नूनम् ॥

इह खलु धर्मार्थकाममोक्षाणां मध्ये धर्मादीनां त्रयाणां क्षयिष्णुत्वेन ... ... ... ... ... ... .... ... ... ... .. तस्य श्रवणमनननिदिध्यासनोत्तरकालिकेतरभिन्नत्वप्रकारकात्मसाक्षात्कारसाध्यत्वाद्वेदान्तवाक्यश्रुत्यात्मस्वरूपस्य पुरुषस्य ... ... .... ... ... ... .... ... ... .... आत्मतदितरपदार्थस्वरूपप्रतिपादितमा... .... .... .... .... .... .... प्रणिनीषुर्भगवान् सूत्रकारस्तस्यां प्रेक्षावतां प्रवृत्तिसिद्धये विषयप्रयोजनादिसम्बन्धमादाय सूत्र ...

End :

तदेवं मङ्गलस्य समाप्तिकारणत्वे सिद्धे प्रकृतग्रन्थेऽपि समाप्तिदर्शनेन मङ्गलानुमानादादृतशिष्टाचारेण कृतत्वादयं तर्कग्रन्थः सद्भिरादरणीय इति सर्वमवदातम् ।

Colophon :

उज्जीवयत् कृतिमिमामुपमाविदूरं
तेजोऽतिशुभ्रमुपकण्ठमुपेतनैल्यम् ।
उत्तंसितेन्दु... ... .. ...
लालाटनेत्रजलजं जगतो हितात्म ॥

परदेवतायै नमः ।

इति श्रीरूपिलवंशाम्बुधिसुधाकरनृसिंहसूरिसुतेन परमाम्बा-गर्भशुक्तिमुक्तामणिना (मेमेठाद्रिबुद्धेन?) वेङ्कटाद्रिबुधेन विरचिते तर्कसारे प्रमाणपरिच्छेदः ।

Author—Kompilla Veṅkaṭabudha, son of Nṛsimha-sūri of Rupila family.

Remarks—Gaps occurring at different places in the transcript indicate that the bulk of its original has been lost. This work is noticed under Nos. 4188, DCSMM. Vol. VIII and 2166, TCM. Vol. III. Part I A. The following introductory verses are seen therein :

"आलिङ्गिताद्रितनयाङ्गमनङ्गलीला-
मूलाङ्कुरायितलसत्पुलकप्रपञ्चम् ।
वेलातिगाश्रितकृपालतिकालवालं
पा(ल्या?या)न्महः किमपि नः परदेवताख्यम् ॥

काम्पिल्लवेङ्कटबुधः प्रथितानुभावान्
वाणीविनायकगुरून् प्रणिपत्य मूर्ध्ना ।
श्रीचेन्निभट्टकृतिभासुरतर्कभाषा-
भावं प्रकाशयति बालविबोधहेतोः" ॥

The lines found herein are but portions of the above verses. *Cenni Bhaṭṭa* is wrongly transcribed as *Janmavṛddha*.

## ॥ तर्कामृतं (तरङ्गिणीसहितम्) ॥

## No. 593. TARKĀMṚTAM

with the commentary, Taraṅgiṇī.

C. O. L. No. 57.

Substance—Paper. Size—13½″ × 8½″. Pages—100. 16 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1200.

Owner—C. O.

Subject—A compendium of *Nyayaśāstra*.

Beginning :

(व्या)

लम्बोदरपदद्वन्द्वचिन्तनाप्तमनोरथम् ।
अनन्तभट्टं मीमांसापारगं तातमाश्रये ॥

शरणीकृत्य विश्वेशचरणं तन्यतेतराम् ।
बालानामवगाहाय तर्कामृततरङ्गिणी ॥

(मू)

ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहाः सदाभीष्टदाः
स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते ॥

(व्या)

ब्रह्माद्या इति । तच्छ्रीविष्णोश्चरणाम्बुजमित्यन्वयः । त्रिदशानां सन्दोहाः समूहाः त्रिदशश्रेष्ठा इति वा । सदा निखिलैरर्चिताः सन्तः सदाभीष्टदाः ।

End :

मुखे आश्रयतासंसर्गेणान्वयः । चन्द्रप्रतियोगिकभेदवत्त्वे सति चन्द्रवृत्तिधर्मवन्मुखमिति बोधः । प्राद्युपसर्गाणां द्योतकत्वम् । तच्च तात्पर्यग्राहकत्वम् । धातूनामनेकार्थत्वात् । न च वैपरीत्यम् । उपसर्गाभावेऽपि धातोरर्थप्रतीतेर्धात्वर्थसत्त्वादुपसर्गादर्थप्रतीत्यभावादित्यादि ।

Colophon :

इति शब्दखण्डः समाप्तः ।
इति तर्कामृततरङ्गिणी समाप्ता ॥
शुभमस्तु ।

Author :

Text—Jagadiśabhaṭṭa.
Com:—Mukunda Bhaṭṭa.

Remarks—The commentary is elegant and concise. It is noticed under No. 4194, DCSMM. Vol. VIII.

## ॥ तार्किकरक्षावृत्तिव्याख्या ॥

No. 594. TĀRKIKARAKṢĀVṚTTIVYĀKHYĀ.

C. O. L. No. 273.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—109. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1635. Complete.

Owner – C. O.

Subject—Elucidative exposition of the Tarkika-rakṣāvṛtti of Varadarāja.

Beginning :

अन्योन्यव्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तिसुलभमव्याद्द्वयमुग्वं महः ॥

यदुपक्रम जनुष्मद्
वर्गो यदुपज्ञमखिलमाम्नायः ।
तमजमनन्तमुपासे
वृषाकपायीमनोरमं देवम् ॥

(अ?ऐ)श्वर्येहावशैर्नित्यं मनोवागादिभिः सुरैः ।
वन्दनीयां भजे देवीं स्वाभीष्टपदसिद्धये ॥

प्रकरणमुदितं गौतम-
मुनिमतमनुसृत्य वरदराजेन ।
विवृणोमि हरिहरोऽहं
भारद्वाजो नृसिंहसूरिसुतः ॥

....कण्ठ्यप्पयाचार्यं वन्दे यस्य कृपावशात् ।
अपि बालाः प्रगल्भन्ते वैदुष्योत्कर्षशालिनः ॥

इह खलु वरदराजो नाम कश्चिद्विपश्चिदक्षपादपक्षिलादिभिरनेकधा लक्षणपरीक्षाभ्यां प्रपञ्चितं पदार्थजातं बालिशानुजिघृक्षया कारिकानिबन्धेन तार्किकरक्षाख्येन ग्रन्थेन संगृह्य तां कारिकां स्वयमेव विवरीतुमारभमाणः प्रारिप्सितस्य ग्रन्थस्य परिसमाप्ति-

परिपन्थिप्रत्यूहसमूहविघाताय शिष्टाचारपरिप्राप्तमिष्टदेवतानमस्कारूपं मङ्गलमादौ निबध्नाति प्रथमश्लोकेन—नमामीत्यादिना।

End :

ननु जैनाः द्विविधं प्रमाणमाहुः । तदपि चतुष्टयविरोध्येवेत्यत आह— स्पष्टमित्यादिना । लिङ्गावगतं धर्मवैशिष्टयेनैव स्फुरतीति स्पष्टमुच्यते । स्वलक्ष्यमात्रावगाहिनि प्रत्यक्षे वैशिष्ट्यं न स्फुरतीति तदस्पष्टमुच्यत इत्यर्थः । परमप्रकृतमुपसंहरति — तस्मादिति । न्यूनाधिकभावस्य निराकृतत्वादित्यर्थः ।

इत्यैतिह्यान्तर्भावः ।

Colophon :

भारद्वाजो नृसिंहार्यसुतो हरिहरः सुधीः ।
व्याख्यद् वरदराजीये प्रमाणानां चतुष्टयम् ॥

कपिलकणभुग्भट्टव्यासप्रभाकरगौतम-
प्रविततखरग्रन्थग्रन्थिप्रकर्तनकर्तरी ।
फणिपतिमतागाधाम्भोधिप्रबोधनसाधनी
हरिहरभरद्वाजाभिख्या सभासु विजृम्भते ॥

बज्ञा षड्दर्शनानां निखिलमखकृता निर्निरोधाध्वदात्रा
काव्यैकश्लोकमात्रे विगलितमतयः पञ्चयज्ञाननभिज्ञाः ।
स्वात्मस्वापत्यपत्नीक्षुदुपशमविधावक्षमा व्यर्थवर्णा
विद्वांसोऽन्ये कथं वा हरिहरविदुषा तुल्यभावं भजेरन् ॥

श्रीगुरुभ्यो नमः ।

Author—Harihara, son of Nṛsiṁhārya belonging to Bhāradvāja Gotra.

Remarks—The text is written in the form of Kārikās. The work is noticed as No. 4197, DCSMM, Vol. VIII, and as No. 6520, DCSMT, Vol. XI.

---

## ॥ तार्किकरक्षावृत्तिव्याख्या ॥

No. 595. TĀRKIKARAKṢĀVṚTTIVYĀKHYĀ.

C. O. L. No. 288.

Substance—Paper. Size—13½" 8½". Pages—317. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—4000. Incomplete.

Owner—C. O.

Subject—Same as No. 594.

Beginning:

पपत्तिमुखेन मावकाशस्य जीवनग्राहकस्य प्रमाणस्य बहिस्सद्भाव-लक्षणविषयान्तरकल्पनमर्थापत्तिः। सा च व्याप्तिस्मरणसहकृत-लिङ्गदर्शनानन्तरभाविनोऽनुमानाद् भिद्यत इति। तदेतद् दूषयति—नैवमिति। व्याहतिमेव व्यक्तीकरोति—प्रमाणयोरिति।

End:

विजयतेतरामिति। रूपा...न्यायवैदग्ध्यस्य सम्प्रदायसिद्धतया न केवलं पदार्थतत्त्वजिज्ञासूनामेवायं ग्रन्थ आदरणीयः। किन्तु विजिगीषूणामपि श्लाघ्य इत्याह—आलोच्येति। अपरेषां पक्षिल-भूषणादीनामित्यर्थः। साधु वावद्यन्त इति वावदूकाः (यजजपदशां

यङ) इति सू(त्रे) वदेरनुप्रवेशः कार्य इति पदकारवाक्यादूकप्रत्यय इति क्षीरस्वामी । यङन्तानां यजजपदशामिति कालापोक्तेरूक इति सर्वानन्दयतिः ।

Colophon :

इयं हरिहरार्येण भारद्वाजेन यज्वना ।
कृता वरदराजीयव्याख्या सद्भिः परीक्ष्यताम् ॥

Author etc.—Same as No. 594.

---

## ॥ तार्किकरक्षावृत्तिव्याख्या ॥

No. 596. TĀRKIKARAKṢĀVṚTTIVYĀKHYĀ.

C. O. L. No. 159.

Substance—Paper. Size—13½″ × 8½″. Pages—428. 18 lines per page and 18 letters per line. Script—Devanāgari. No. of Granthas—4200. Complete.

Owner—C. O.

Subject—Same as No. 594.

Beginning :

सकृन्नत्वापि यं लोको लभते शान्तिसम्पदम् ।
स नः पायादपायेभ्यो योगानन्दनृकेसरी ॥

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

पारङ्गतं सकलदर्शनसागराणा-
मात्मोपदेशचरितार्थितसर्वलोकम् ।
श्रीशाङ्गपाणितनयं निखिलागमज्ञं
सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् ॥

पदवाक्यप्रमाणपारदृश्वा वरदराजो नाम विद्वान् मत्सम्प्रदाय-प्राप्तविद्याशुश्रुत्सया शिष्यानुजिघृक्षया च न्यायशास्त्रार्थसंग्रहं कतिपयैः पद्यैर्विधाय तानि पद्यानि दुर्ग्रहार्थानि मन्वानो व्याचिख्यासुः प्रारिप्सितप्रबन्धप्रत्यूहप्रशान्तये प्रचयगमनाय च शिष्टाचारपरम्पराप्राप्तविशिष्टेष्टदेवताप्रणामलक्षणं मङ्गलमाचरन् नमो ब्रह्मणे नमो विष्णवे नमस्कृत्य हि वसीयांसमुपचरन्ति इत्यादिकां श्रौतीं रीतिमनुकरोति --नमामि परमात्मानमिति ।

End :

अत एवास्य तत्त्वनिर्णयः फलमनुक्तसिद्धमित्यभिसन्धाय प्रतिमतशासनाभावे तत्त्वमुपदिष्टमप्यनुपदिष्टप्रायं स्यादिति ग्रन्थस्य परमतापाकरणतोपायतामेव प्राधान्येनोपदिशति — आलोड्येति । यथा वरदराजेनाम्भोधेर्दुस्तरान् गभीरतरान् प्रवाहानालोड्य सारः संगृहीतः । सोऽपि पूर्वं देवैः पूर्वदेवविजिगीषुभिर्धृतः । तथा वरदराजेन मयाप्यान्वीक्षिकीविद्याप्रबन्धानालोड्य संगृहीतः सारो बौद्धादिबाह्यदर्शनप्रवर्तकासुरविजिगीषुभिः सुमनोभिरेव धार्य इति रूपकव्यक्तिरिति सकलं समञ्जसम् ।

Colophon :

आसाक्षात्त्वनिरुक्तीयमुपाध्यायैर्निरूपिता ।
शिष्टा रामेश्वरार्येण विज्ञेया रचिता मया ॥

पञ्चक्लेशहरो नृणां कवयतां पञ्चाक्षरीतत्त्ववित्
पञ्चास्यः प्रतिवादिदन्तिदलने पञ्चाग्निहोमोद्यतः ।

पञ्चग्रन्थ्यवधारणानिपुणधीः पञ्चद्रुमौदार्यवान्
पञ्चेज्यानिरतोऽन्वहं विजयते श्रीचेन्निभट्टः सुधीः ॥

पारं सद्गुरुनाविकं गतवते विश्वस्य विद्याम्बुधेः
पर्यायामरदेशिकाय रभसाद् गोष्ठीं गरिष्ठां गतः ।
कः स्पर्धेत कणादपाणिनिगुरुव्यासाक्षपादोदित-
ग्रन्थग्रन्थिविभेददक्षिणधिये श्रीचेन्निभट्टाय ते ॥

इति रामेश्वरार्यविरचिता सारसंग्रहभूषिका समाप्ता ।
शुभं भूयात् ।

Author—Cennibhaṭṭa and Rāmeśvarārya.

Remarks—From the following *ślokas*

"व्याख्यायैतावतो ग्रन्थांश्चेन्निभट्टाह्वयः सुधीः ।
आकारितः सुरेन्द्रेण व्याचिकीर्षुः स्वरभ्यगात् ॥

अथ रामेश्वरार्येण तदन्तेवासिना सता ।
व्याख्या विलिख्यते ख्याता सारसङ्ग्रहभूषिका ॥ "

it is known that the commentary up to *Indriya-lakṣaṇa* was composed by Cennibhaṭṭa while the supplementary portion thereof is ascribed to Rāmeśvarārya, a disciple of the former. This fact is evident from *śloka* beginning with "आसाक्षात्स्वनिरुक्तीय" in the colophon. The work is identical with No. 2923, TCM. Vol. IV, Part I A. The first portion of the commentary is known as Sārasaṅgrahavivaraṇa and the second, as Sārasaṅgrahabhūṣikā.

## ॥ तार्किकरक्षावृत्तिव्याख्या ॥

## No. 597. TĀRKIKARAKṢĀVṚTTIVYĀKHYĀ.

C. O. L. No. 906.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—84. 9—11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2500. Incomplete.

Owner—Svāmiārmaṭham, Muñcira.

Subject—Beginning: Same as No. 594.

End :

त्रसरेणुः सावयवैरारब्धो भवितुमर्हति कार्यमहत्त्वाधिकरणत्वात् घटवदित्याद्यनुमानादवयविनो द्व्यणुकस्य सिद्धिः । तस्यावयवित्वेन स्वतो न्यूनपरिमाणकोपादानत्वे सिद्धे यन्न्यूनपरिमाणकमुपादानं स परमाणुः सिध्यतीत्यर्थः । अणुतारतम्यमिति। यथा महत्त्वपरिमाणतारतम्यविश्रान्तिभूमिः परममहानाकाशादिः सिद्धः, तथाल्पपरिमाणतारतम्यविश्रान्तिभूमिः परमाणु ... ... ...

.... ... ... .... ... ... ...

... ... ... .... .... ... ....

Colophon :

इति निर्णयपदार्थः ।

इयं रामेश्वरार्येण तदन्तेवासिना सता ।
व्याख्या विलि......सारसंग्रहभूषिका ॥

Author—Same as No. 594.

Remarks—The recto half of this Ms. is completely mouldered.

---

## ॥ निरुक्तिविवृतिः ॥

## No. 598. NIRUKTIVIVṚTI.

C. O. L. No. 1725.

Substance—Palm leaf. Size—14″ × 1⅝″. Leaves—86. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—2250.

Owner—Sūryan Tuppan Bhaṭṭatiri, Naṭṭāśśeri, Kottayam.

Subject etc.—Same as No. 853, DCSMMPL.

Remarks—Many leaves are missing in the middle of the Ms. Two leaves are partly worm-eaten. The work is identical with No. 6368, DCSMT. Vol. XI. Therein the date of Viṣṇubhaṭṭa is fixed as the 16th Century A. D. The following verses occur after the colophon:

दशरथवसुदेवपूर्वजन्मा-
जितसुतपःफलरूपपुण्यदेहौ ।
सकलभुवनपालनप्रसिद्धौ
सततमहं प्रणमामि रामकृष्णौ ॥

या त्वरा द्रौपदीत्राणे या त्वरा गजरक्षणे ।
मय्यार्ते करुणामूर्ते सा त्वरा क्व गता हरे ॥

विगतविविधरागद्वेषदोषात्मभक्त-
प्रकटितनिजरूपौ पावनौ पावनानाम् ।
रणविजितसुरारी रक्षिताशेषलोकौ
रघुयदुकुलदीपौ रामकृष्णौ भजेऽहम् ॥

चञ्चद्देवेन्द्रकुड्यश्वलितदशदिशाकीर्णकोटीरकोट्यो
विश्लिष्यच्चर्मपटचो विगलितशतपत्रासनोद्यत्करोट्यः ।
संगायत्स्वर्वधूटयः सरभसविनमत्सिद्धगन्धर्वधाट्य-
स्तुट्यत्कैलासतट्यस्त्रिपुरविजयिनः पान्तु मामारभट्यः ॥

वामकुचचूचुकनिविष्टमणिवीणा-
वादनविनोदवल... ... भाराम् ।
नीपविपिनान्तरलसत्कनकडोला-
खेलनकरीं गिरिसुतामहमुपासे ॥

## ॥ न्यायविलासः ॥

## No. 599. NYĀYAVILĀSA.

C. O. L. No. 434.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—476. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—6000.

Owner—C. O.

Subject—Explication of the Tattvaprabodhinī of Gaṇeśa Dīkṣita.

Beginning :

कैलासे रावणोद्धूते परिरम्भोद्यतां शिवाम् ।
भियैव सस्मितः पश्यन् पातु मां चन्द्रशेखरः ॥

विघ्नौघमत्तेभविदारणार्थ-
मिवाङ्कुशासक्तकरं गणेशम् ।
विघ्नोपशान्त्यै विमलेन्दुचूडं
बालार्कवर्णं सततं स्मरामि ॥

द्विजसङ्घसमाकीर्णं हंसश्रेणिसमावृतम् ।
अस्मत्कुलगुरुं ब्रह्मविद्यातीर्थमहं भजे ॥

यदन्तेवासिशरभैर्वादिकेसरिणो जिताः ।
तं तातं सर्वतन्त्रज्ञं यज्ञ्याख्यं गुरुं नुमः ॥

व्याख्यां तत्त्वप्रबोधिन्या विश्वनाथः स्वमातरम् ।
नत्वा न्यायविलासाख्यां वितनोति यथामति ॥

श्रीरामाय नमः । स्वचिकीर्षितग्रन्थपरिसमाप्तिप्रतिबन्धकविघ्न-निवृत्तये कृतं मङ्गलं शिष्यशिक्षायै शिष्टाचारोल्लङ्घनेन स्वस्य प्रमत्तत्वशङ्कया स्वकृतग्रन्थस्य प्रेक्षावदनुपादेयतावारणाय च ग्रन्थतो निबध्नाति — केशवरूपैरिति ।

End :

तथा च भावत्वे अभावत्वप्रवेशे अन्योन्याश्रय इति चेत् । न । अन्यशब्देनान्यपदवाच्येत्यस्य विवक्षितत्वात् । यद्वा द्रव्यादिविषय-कसमूहालम्बनप्रतीतिविशेष...भावत्वमिति न कोऽपि दोषः । एत-दभिसंधायाह—इति संक्षेप इति ।

Colophon

इति श्रीमहोपाध्यायपक्षधर(म)छयार्यविद्वङ्कर(न)न्दनेन सर्व-

पाध्यायविश्वनाथ... .... .... धीशेन विरचिते तत्त्वप्रबोधिनीप्रकाशे न्यायविलासाख्येऽभावपदार्थपरिच्छेदः समाप्तः ।

Author—Viśvanātha Bhaṭṭ.

Remarks—Brahmavidyātīrtha was the family-priest of the author. His father Yellayya was an eminent scholar. He must have flioursh-ed during the 17th century A. D. (See DCSMT, Page 4651.)

---

## ॥ न्यायशिखामणिः ॥

## No. 600. NYĀYAŚIKHĀMAṆI.

C. O. L. No. 210.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—622. 10—17 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—4700.

Owner—C. O.

Subject—A commentary on the Tattvacintāmaṇi-prakāśa.

Beginning :

श्रीः ।

ननु प्रमाणतत्त्वमत्र विविच्यत इत्यनेनैव प्रेक्षावत्प्रतिपित्सितार्थप्रतिज्ञासिद्धेः शेषवैयर्थ्यम् । न चान्वीक्षिकीप्रयोजनमोक्षाभिधानमुखेन तत्प्रतिपाद्यैकदेशप्रमाणतत्त्वनिरूपकस्य ग्रन्थस्यापि तत्प्रयोज-

कसिद्धेर्न वैयर्थ्यमिति वाच्यम् । यतो मणेरित्यादिनैव स्वग्रन्थप्रयोजनस्योक्तत्वादित्याशङ्क्य प्रेक्षावत....

End :

अयमाशयः—तावद्विशेष्यसन्निकर्षस्यान्वयव्यतिरेकाभ्यां वैशिष्ट्यसन्निकर्षत्वेन कारणता । विशेषणादिसन्निकर्षे सति तद्विलम्बे कार्यविलम्बात् । नापि विशेषणसन्निकर्षादेर्यत्कारणतावच्छेदकं तदवच्छिन्नत्वात् सोऽपि हेतुहेतुरिति । अयुक्तम् अलौकिकम् । लौकिकसाधारणस्य विशेषणसन्निकर्षस्य कारणताविशेष्य .... ....

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते न्यायशिखामणौ प्रमाणपरिच्छेदः समाप्तः ।

Author—Rāmakṛṣṇādhvarī, son of Dharmarājādhvarī.

Remarks—This work is bereft of its beginning and close. It is noticed under Nos. 6228—6229 DCSMT. Vol. XI. The author flourished in the 17th century A. D.

## ॥ न्यायसारः ॥

## No. 601. NYĀYASĀRA.

C. O. L. No. 441.

Substance—Paper. Size—13½″ × 8½″. Pages—26.
7

2) lines per page and 24 letters per line. Script—D vanāgarī. No. of Granthas—400.

Owner—C. O.

Subject—The basic principles of Nyāyaśāstra.

Author—Bhāsarvajña.

Remarks—A different work entitled Nyāyasāra of Mādhavadeva is noticed as No. 6548, DCSMT. Vol. XI.

---

## ॥ न्यायसारपदपञ्चिका ॥

## No. 602. NYĀYASĀRAPADAPAÑCIKĀ.

C. O. L. No. 1868.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—113. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Brahmadattan Nambūri, Kūḍallūr.

Subject—A commentary on the Nyāyasāra.

Author—Vāsudevasūri.

Remarks—This has been printed as No. 109 in TSS.

---

॥ न्यायसारव्याख्या (व्याख्यारत्नम्) ॥

No. 603. NYĀYASĀRAVYĀKHYĀ.

Vyākhyāratnam.

C. O. L. No. 897.

Substance—Palm leaf. Size—11″ × 2″. Leaves—52. 10 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—1350. Complete.

Owner—Svāmiārmaṭhom, Mañcira.

Subject—Same as No. 602.

Beginning :

.... ... ... पतये नमः ।

गुरुं गिरं गौरीं हरं .... ... ... ....

.... .... .... ....

पराप्रापितकर्तव्य . . . . . . . . पं परदेवतास्तुति . . . . . ङ्गलं सम्पादयितु. . . . . . . . . . . . . . . . . . . . . .प्रयोजनाभिधेयसम्बन्धप्रतिपादनाय च .... .... .... .... स्येति ।

अत्र नमस्कारस्य .... .... .... .... ....द्वातिशयोत्कर्ष-प्रतिपादनाय प्रशब्दोपादानम् ।

End :

निगमयति —तत्सिद्धमिति । अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशतः न प्रेत्य संज्ञास्तीति च श्रुतिः सांसारिकसुखज्ञाना-भावाभिप्रायेणेति भावः ।

प्राचामाचार्याणां
वाचां सद्गुम्फनं समालोच्य ।
विद्यासागरमुनिना
विवृतोऽसौ न्यायसार इति युक्त्या ॥

Colophon :

इति श्रीमद्विद्यासागरमुनीन्द्रविरचिते न्यायसारव्या-ख्याने तृतीयः परिच्छेदः ।

श्रीमाधवानुभूतिश्रीचरणानामिदं पुस्तकम् । अस्मिन् न्या-यसारव्याख्याने त्रयस्त्रिंशत्पत्राणि करुणाकरेण लिखितम्? । ..... .... अर्थश्च ।

Author—Vidyāsāgaramuni.

Remarks—The Ms. is old and much damaged. The script is also ancient.

## ॥ न्यायसारव्याख्या (शिशुहितैषिणी) ॥

## No. 604. NYĀYASĀRAVYĀKHYĀ
### (Śiśuhitaiṣiṇī.)

C. O. L. No 672.

Substance—Paper. Size—11″ × 8½″. Pages — 30. 20 lines per page and 25 letters per line. Script—Devanāgarī. No. of Granthas—450. Inomplete.

Owner—C. O.

Subject—Same as No. 602.

Beginning :

श्रीमहागणपतये नमः ।

लसन्नृत्तारम्भभ्रमविवशभोगीश्वरशना-
वलीढ ......सरिदु(पत)टान्दोलितवपुः ।
जटाजूटे रौप्यं बलिशमिव शीतांशुशकलं
गिरीशो बोभूयाज्जननमकरोन्माथरसिकः ॥

नमामि गिरिजालताचरणपल्लवात्त्रुल्लस-
न्नखावलिरुचिच्छटास्तबकहारसंभूषिते ।
विनम्रशिरसां ययोर्जयति यागयोगौ विना
चतुर्विधफलावलिः करतलोदरे क्रीडति ॥

लीलान्दोलितकर्णतालपवनोड्डीनालिमालो.... ....
.... .... .... .... .... ।
.... मूर्ध्नि पितुर्मुखेन यमुनां वीक्ष्यैव दानच्छलाद्

यो धत्ते स गजाननो वितरतु श्रेयांसि भूयांसि वः ॥

भासर्वज्ञप्रणीतस्य न्यायसारस्य भक्तितः ।
सुबोधैरक्षरैः कुर्वे व्याख्यां शिशुहितैषिणीम् ॥

न्यायसाराख्यं प्रकरणवार्त्तिकं चिकीर्षुराचार्यश्चिकीर्षितस्य प्रकरणस्याविघ्नेन परिसमाप्तिप्रचयपरिपन्थि(नि?)कल्मषनिवृत्तये शिष्टाचारप्रतिपालनाय च विशिष्टेष्टदेवतां नमस्करोति प्रतिपाद्यं चार्थं सङ्क्षेपतो दर्शयति—प्रणम्येति ।

End :

चतुर्णां जातिभेदानां यथाक्रमेणोदाहरणानि दर्शयति —कृतकत्वाद् घटवदनित्यः शब्द इत्यादिना । परिहारत्वेन समासनतार्थं व्यचष्टे — एतेषामुत्तरमित्यादिना । अयमर्थः — पर्वतो निर्धूमत्वान्महानसवदित्यादौ किञ्चित्साधर्म्याद् धूमवत्त्वादिरूपादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेध इति महानसवन्महानसमव्याप्यादिवन्महानिसन् महा(?) .... .... .... ....

Colophon :

इति शिशुहितैषिण्यां न्यायसारटीकायां श्रीमद्रत्नपुरीभट्टारकरचितायां प्रत्यक्षपरिच्छेदो नाम प्रथमः ।

Author—Ratnapurī Bhaṭṭāraka.

Remarks—This work substantiates the views held by Bhāsarvajña. In CC. (p. 310, Vol. I) a different name Nyāyasāraṭīkā is given to this work.

## ॥ न्यायसिद्धान्तमञ्जरीव्याख्या (आमोदः) ॥

## No. 605. NYĀYASIDDHĀNTAMAÑJARĪ-VYĀKHYĀ (Āmoda.)

C. O. L. No. 806.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages—142. 20 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas—2500.

Owner—C. O.

Subject—Same as No. 602.

Beginning:

यत्पादपङ्कजरजांसि नतालिदोष-
विद्यारिदोषततिदुष्टपिशाचिकायाः ।
उच्चाटना........चूर्णमयानि भान्ति
त.....कृष्णगुरुमग्रजमाश्रितोऽस्मि ॥

मिथः कलहभाषिणो मकुटडम्बरास्त्रै.....
पदाम्बुरुहयुग्मकप्रणमनाय यस्याः सदा ।
परस्परविघट्टनक्वणितघङ्कणाकङ्कण-
ध्वनिच्छलत....न्द्रशतं सा जगन्मातृका ॥

निर्विघ्नपरिसमाप्तिकामाय कृतं मङ्गलं शिष्यशिक्षायै प्रतिपादयन् शिष्यावधानार्थं चिकीर्षितं प्रतिजानीते—प्रणम्येति । ननु मङ्गलस्य कथं निर्विघ्नपरिसमाप्तिफलकत्वमिति चेदत्र प्राञ्चः ।

End :

यदि च स्वाश्रयसमवेतद्रव्यत्वसमवायरूपकारणतावच्छेदकसम्बन्ध इति ब्रूषे, तदापि संयोगत्वविभागत्वाद्यवच्छिन्नं प्रति विशेष्यकारणताकल्पनामपेक्ष्य जन्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यस्य हेतुताया एव लघुत्वात् न तादृशकार्यकारणभावसिद्धिरित्यस्वरसादाह---अप्रयोजकत्वमिति । इदं विशुत्वसाधकानुमानम् ।

Colophon :

पराभवाब्दे सहमासि सौम्ये
ऋक्षे च विष्णोः सितपञ्चमीतिथौ ।
आमोदरूपो लिखितो बुधानां
श्रियो निवासाश्रितनामकेन ॥

Author :

Remarks—The author of the text is Cūḍāmaṇi Bhaṭṭācārya but evidence is lacking to determine the identity of the commentator. The colophon furnishes the scribe's name and the date of transcription. The work is noticed as No. 574, TCM. Vol. I. Part I C and No. 992, TCM. Vol. II. Part I A.

---

## ॥ न्यायसिद्धान्तमञ्जरीव्याख्या (दिव्यपरिमलः) ॥

### No. 606. NYĀYASIDDHĀNTAMAÑJARĪ-VYĀKHYĀ. (Divyaparimala.)

C. O. L. No. 1859.

Substance—Palm leaf. Size—13⅜" × 1⅜". Leaves—

54. 9—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Brahmadattan Nambūrippād, Kūḍallūr.

Subject—A commentary on the Siddhānta Mañjarī.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । सरस्वत्यै नमः ।

अम्बामीशकुटुम्बिनीमवनतश्रीनाथदेवेण्मुख-
श्रीमन्मौलिलगत्किरीटविलसन्माणिक्यकान्तिस्थिते ।
राजत्स्वप्रतिबिम्बिते प्रतितनुं स्वीयां समीक्ष्य स्फुटं
हासाङ्कूरकरम्बिताधरमुखीं प्रत्यूहशान्त्यै भजे ॥

विघ्ना(न्त?न्ध)कारतरणिं (श्र?श्रु)तिशाखिमूलं
विद्याप्रसूनसुरशाखिनमिन्दुशोभम् ।
वीक्षासमेधितविनम्रजनेहितार्थं
वन्दे शिवं यतिवरं मम देशिकं च ॥

यज्ञेश्वराख्यादधिगम्य तर्कान्
गुरोर्मखीन्द्रादवधानियज्वा ।
व्याख्यामसौ रामखीन्द्रसूनुः
श्रीजानकीनाथकृतेस्तनोति ॥

इह खलु प्रारिप्सितग्रन्थपरिपन्थिविघ्नसङ्घोपशमनाय जानकीनाथो नाम सुधीश्वरः शिष्टाचारसमागतसमुचितेष्टदेवताप्रणामरूपमङ्गलं स्वाचरितं शिष्यहिताय विरचयन्

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"

इति न्यायात् प्रेक्षावत्प्रवृत्तिप्रयोजनाय प्रयोजनाभिधेयाधिकारिसम्बन्धान् ग्रन्थान्तरवैलक्षण्यं च स्वग्रन्थस्य प्रकाशयन् शिष्यावधानाय न्यायप्रकरणं प्रतिजानीते—प्रणम्येति ।

End :

चतुर्थपक्षं दूषयति—अप्रयोजकमिति । आत्मानुकूलतर्काभावाद् धर्मिग्राहकमानेनाविभुत्वेनैव मनस्सिद्धेर्विभुत्वस्य बाधितत्वान्निस्पर्शद्रव्यत्वहेतोः पक्ष एव व्यभिचारित्वादात्मत्वाभिन्नद्रव्यत्वव्याप्यत्वे जातिशून्यत्वे च सोपाधिकत्वाच्चाणुरूपमेव मन इति नाणुत्वघटितलक्षणासम्भव इति भावः ॥

Colophon :

इत्यवधानिदीक्षितकृतौ सिद्धान्तमञ्जरीव्याख्यायां दिव्यपरिमलसमाख्यायां प्रत्यक्षपरिच्छेदः समाप्तः ॥

Author—Text—Jānakīnātha.

Com :—Avadhāni Dīkṣita, son of Rāyamakhīndra and disciple of Yajñeśvaradīkṣita.

Remarks—This Ms. contains the Pratyakṣa Khāṇḍa in its entirety. It is in good condition. The colophon shows that the text is also known as Siddhāntamañjarī.

---

## ॥ पञ्चलक्षणी (भवानन्दीयप्रकाशसहिता) ॥

### No. 607 A. PAÑCALAKṢAṆĪ
### with Bhavānandīyaprakāśavyākhyā.

C. O. L. No. 35 A.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—158,

14—18 lines per page and 23 letters per line. Script—Devanāgarī. No. of Granthas—1580.

Owner—C. O.

Subject—Elucidation of *Vyāpti*.

Beginning:

श्रीः ।

मणिदीधितिव्याख्याने प्रकाशिकाख्यव्याख्यासमेतभवानन्दीयेऽनुमानखण्डे पञ्चलक्षणी ।

मणिः—

व्याप्तिग्रहोपायश्च वक्ष्यते । ननु अनुमितिहेतुभूतव्याप्तिज्ञाने का व्याप्तिः ।

दीधितिः — सर्वमिदं सति व्याप्तिनिश्चये स्यात् ।
भवानन्दीयम् — सर्वमिदमनुमानप्रामाण्यसाधनम् ।

भवानन्दीयव्याख्यानम्—

नत्वा पदाम्भोजयुगं शिवस्य
स्मृत्वा गुरूक्ताखिलयुक्तिमूलम् ।
कृत्वा निगूढार्थविभावनां च
व्याख्यायते व्याप्तिरहस्यमात्रम् ॥

नन्वनुमानप्रामाण्यव्यवस्थानिर्वाहणव्याप्तिग्रहोपाय एव कथनार्हः । नतु व्याप्तिस्वरूपं कथनार्हम्, प्रयोजनाभावादिति । नन्वित्यादिना व्याप्तिस्वरूपारम्भणं व्यर्थम् ।

End:

मान्यास्तु काल एव साध्यसामानाधिकरण्यप्रसिद्ध्या ना-

व्याप्तिः । तादात्म्यवृत्त्यनियामकसम्बन्धस्याप्यवच्छेदकतानियामकत्वात् । कथमन्यथा शरीरभेर्यादिज्ञानिशब्दाद्यवच्छेदकत्वम् । सम्बन्धान्तरे वर्तमान इत्यादिग्रन्थस्तूपलक्षणपर इत्याहुः । इत्यलमतिशयविस्तरेण ।

सिंहव्याघ्रलक्षणयोर्व्याख्यानात् प्रीयतां शिवः ।
सिंहवाहनयाश्लिष्टदेहो व्याघ्राजिनाम्बरः ॥

Colophon :

इति श्रीमन्महादेवविरचिते भवानन्दीयप्रकाशे सार्वभौमपरिष्कारप्रकाशः समाप्तः ।

Author—Com : Mahādeva.

Remarks—The Ms. is of very fair accuracy.

---

## ॥ चतुर्दशलक्षणी ( भवानन्दीयप्रकाशसहिता) ॥

No. 607 B. CATURDAŚALAKṢAṆĪ
with the commentary, Bhavānandīyaprakāśa.

C. O. L. No. 35 B.

Substance—Paper. Size—13⅓" × 8½". Pages—156. 10—17 lines per page and 18—20 letters per line. Script—Devanāgarī. No. of Granthas—1560. Incomplete.

Owner—C. O.

Subject—Same as No. 607 A.

Beginning :

मणिः—

अथेदं वाच्यम्, ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः । व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात् । दीधितिः — समवायितयेति । वाच्यत्वं यथा न समवायि तथाग्रे वक्ष्यते । घटादिसमवायितयेत्यर्थ इत्याहुः ।

भवानन्दीयम्—

नन्वसाच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छैव वाच्यत्वम् । सा चेश्वरे समवेता । समवायिनीच्छात्वादेरतः कथं समवायित्वं तद्व्यधिकरणधर्म इत्यत आह — वाच्यत्वं यथेति ।

भवानन्दीयव्याख्यानम् —

केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनामुक्तामव्याप्तिं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाङ्गीकर्तृसौन्दलमतमवलम्ब्योद्धर्तुमाशङ्कते — अथेति ।

End :

असम्भवमेवोपपादयति—तत्र चेति । अवच्छेदकत्वाकल्पनादवच्छेदकत्वकल्पनासम्भवात् । तथा च मन्मते गवाद्यधिकरणकाले कालिकतया गवाद्यभावस्याव्याप्यवृत्तित्वेन तद्देशस्यावच्छेदकत्वसम्भवेनोक्तस्थले तथाप्रत्ययस्य तद्देशावच्छेदेन तत्काले गवाद्यभावविषयकत्वसिद्धिर्निष्प्रत्यूहैव ।

Colophon :

Author—Com : Mahādeva.

Remarks—Same as No. 607 A

## ॥ पञ्चलक्षणीव्याख्या ॥

## No. 608. PAÑCALAKṢAṆĪVYĀKHYĀ.

C. O. L. No. 2384.

Substance—Palm leaf. Size—15″ × 1″. Leaves—69. 7 lines per page and 44 letters per line. Script—Grantha. No. of Granthas — 1250.

Owner—Śivarāmasubrahmaṇya Śāstrī, Valivīśvaram.

Subject—Same as No. 607 A.

Beginning :

परामर्शेतीति । परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणमित्यर्थः । प्रत्यक्षेऽतिव्याप्तिवारणाय सत्यन्तम् । परामर्शध्वंसेऽतिव्याप्तिवारणाय विशेष्यभागः । यद्यपि परामर्शप्रत्यक्षमपि विषयतया परामर्शजन्यं, तथापि परामर्शनिरूपितसमवायसम्बन्धावच्छिन्नजन्यत्वस्वभा(व)तया परामर्शप्रत्यक्षस्य विषयतासम्बन्धावच्छिन्नजन्यत्वेऽपि समवायसम्बन्धावच्छिन्नत्वाभावान्नातिव्याप्तिरिति भावः ।

End :

गोलकादेरिव तद्वृत्तित्वस्यापि अवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ।

Colophon :

पञ्चलक्षणी समाप्ता ।

Author—Gadādhara.

Remarks—Pañcalakṣaṇī is attributed to Madhuranātha (Vide No. 3543 (b), TCM. Vol. IV. Part I B.) The work is printed in Benares.

---

## ॥ पदार्थतत्त्वनिरूपणम् (सव्याख्यम्) ॥

## No. 609. PADĀRTHATATTVANIRŪPAṆAM with commentary.

C. O. L. No. 76.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—122. 14—16 lines per page and 20 letters per line Script—Devanāgarī No. of Granthas—1150. Complete.

Owner—C. O.

Subject—A compendium of Nyāyaśāstra.

Beginning :

(मू)—ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अथ पदार्थतत्त्वं निरूप्यते । तत्र दिक्कालौ नेश्वरादतिरिच्येते मानाभावात् ।

(व्या)—नन्दनन्दनपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद् रघुदेवः समासतः ॥

कामहस्तधृतशस्त्रकार्मुकं पौष्पमद्भुतमुदीक्ष्य कुप्यतः ।
धूर्जटेर्नयनकोणशोणिमा हन्तु सर्वजगतामुपद्रवम् ॥

पदार्थतत्त्वं यदिदं शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणैः ।
तदेव तर्केण विचारयामः सदर्थकेनेतरखण्डनेन ॥

प्रसङ्गात् पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रतिजानीते— अथेत्यादिना । नञ्पदादेः संसर्गाभावत्वान्योन्याभावत्वादौ शक्यतावच्छेदकत्वव्यवस्थापनानन्तरं प्राचीनाभ्युपेतपदार्थानां कस्यचिदनतिरिक्तत्वं, कस्यचित् खण्डनं, कस्यचिदतिरिक्तत्वं तर्केण व्यवस्थाप्यत इत्यर्थः । तत्रेति । प्राचीनाभ्युपेतपदार्थेषु मध्य इत्यर्थः । दिक्कालावित्यादि ।

End :

(मू)—सर्वशास्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत साम्प्रतम् ॥

रीतिरेषा न दोषाय सेविता पूर्वपण्डितैः ।
यन्निजोक्तिविचाराय याचन्ते विदुषोऽपरान् ॥

(व्या)—भवादृशान् पण्डितान् । एषा पूर्वश्लोकोक्ता । पूर्वपण्डितैः वाचस्पतिमिश्रादिभिः । अपरानिति । पण्डितानित्यर्थः ।

पदार्थखण्डनाकूल(?)पुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतम् ॥

श्रीमद्दीधितिकारकल्पितघटाकोलाहलव्याकुले
मार्गे सञ्चरता मया निगदितं सिद्धान्तसिद्धेत्तरत् ।
दैवात् तेन भवेद् यदीह सहसा प्रौढापराधो मम
क्षन्तव्यः कृतिभिः क्रियेदिह(?)भवेद् यक्षानुरूपो बलिः ॥

Colophon—Text :

इति रघुनाथभट्टाचार्यशिरोमणिकृतं पदार्थतत्त्वनिरूपणम् ।

Commentary :

इति श्रीरघुदेवभट्टन्यायालङ्कारभट्टाचार्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ।

Author — Text : Raghunāthabhaṭṭācāryaśiromaṇi.
Com : Raghudevabhaṭṭa.

Remarks—The colophon discloses that the work is also designated Padārthakhaṇḍanavyākhyā. It is identical with No. 4264, DCSMM. Vol. VIII. Various commentaries on the text are extant, composed by Nyāyavācaspati Bhaṭṭācarya, Viśvanāthasiddhāntapañcānana Bhaṭṭācarya etc. (Vide Nos. 2141 a and b, TCM. Vol. III. Part I A.)

---

## ॥ पदार्थतत्त्वनिरूपणम् (सव्याख्यम्) ॥

No. 610. PADĀRTHATATTVANIRŪPAṆAM
with commentary.

C. O. L. No. 546.

Substance—Paper. Size—11″ × 8¾″. Pages — 42. 20 lines per page and 26 letters per line. Script—Devanāgarī. No. of Granthas — 675. Owner—C. O.

Subject—Beginning : Same as No. 609.

End :

जन्यत्वस्य कालिकसम्बन्धेन घटत्वादिमत्त्वरूपस्यापि वक्तुम शक्यत्वादिति तु नाशङ्कनीयम् । यतोऽत्र कालिकसम्बन्धेन घटा-

दिमत्त्वरूपजन्यत्वस्य महाकालसाधारण्येन प्रकृते कार्यतावच्छेदकस्य नित्यसाधारण्यं न मङ्गच्छत इति ध्वंसप्रतियोगित्वरूपं प्रागभावप्रतियोगित्वरूपं वा जन्यत्वमत्र निवेशनीयम् । वस्तुतस्तु नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वाङ्गीकारेण सत्त्वमात्रस्यैव द्रव्यकार्यतावच्छेदकतया जन्यत्वस्य तत्र निवेश एव नास्ति । क विनिगमनाविरहेण तस्य ना.... .... ... ...

Author—Same as No. 609.

Remarks—This transcript contains the text and a portion of the commentary which extends up to "सत्ताया जातित्वनिराकरणम्". Some textual portions are not commented upon. A gap is also seen in the middle of the commentary.

## ॥ पदार्थसंग्रहव्याख्या ॥

No. 611. PADĀRTHASAṄGRAHAVYĀKHYĀ.

C. O. L. No. 800.

Substance—Paper. Size—11″ × 8½″. Leaves—36. 20 lines per page and 30 letters per line. Script—Devanāgarī. No. of Granthas—675. Incomplete.

Owner—C. O.

Subject—The characteristics of seven *padārthas.*

Beginning:

श्रीः । श्रीमत्कणादाय नमः ।

इह खलु मोक्षसाधनमात्मतत्त्वज्ञानमामनन्ति । तच्च पदार्थतत्त्वज्ञानाधीनम् । पदार्थतत्त्वं च पदार्थानां संगृह्य कथनं विना न सुखेन ज्ञातुं शक्यमिति संगृह्य कथनं चिकीर्षुः तस्याविघ्नेन परिसमाप्त्यर्थं शिष्टाचारानुमित—"समाप्तिकामो मङ्गलमाचरेत्"इत्याकारकश्रुतिबोधितकर्तव्यताकमाचार्यप्रणातिलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—श्रीमदिति ॥

ननु मङ्गलस्य समाप्तिं प्रति न कारणत्वम् ।

End:

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानामन्तरिन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्शशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानामेकेन्द्रियग्राह्यत्वम् । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्काराणां द्वीन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्शबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म... ... ... ...

Colophon:

इति मनोनिरूपणम् । इति द्रव्यनिरूपणं समाप्तम् ।

Author:

Remarks—The work elucidates the essential features of the seven substances with a descriptive introduction.

## ॥ प्रमाणमञ्जरी ॥

### No. 612 A. PRAMĀṆAMAÑJARĪ.

C. O. L. No. 1699 A.

Substance—Palm leaf. Size—14″ × 1¼″. Leaves—14.

6 lines per page and 51 letters per line. Script—Malayāḷam. No. of Granthas — 275. Complete.

Owner—Keśava Piṣārodi, Kailāsapuram.

Subject—Definition of 7 *Padārthas* beginning with *Dravya.*

Beginning:

कासारतीरसरसीरुहमाददानः
शुभ्रं भ्रमद्भ्रमरमध्यमिवेन्दुबिम्बम् ।
द्वैमातुरश्चिरतनुर्भवतः स पायात्
सञ्जातनिर्मलजलप्रतिबन्धनर्मा ॥

अभिवन्द्य वि..... धार्मिणं चरणावृतम् ।
प्रमाणमञ्जरी सर्वदेवेन क्रियते मया ॥

अभिधेयः पदार्थः। स भावाभावभेदेन द्विधा। पूर्वो विधिविषयः। स षोढा द्रव्यादिभेदेन। समवायिकारणं द्रव्यम्। तन्नवधा पृथिव्यादिभेदेन । गन्धवती पृथिवी । सा द्विधा नित्यानित्यभेदेन । पूर्वा परमाणुः । नित्यः क्रियावान् परमाणुरिति सामान्यलक्षणम् । परमाणुर्गन्धवान् पार्थिवपरमाणुः ॥

End:

द्दश्यस्य प्रतियोगिनो ज्ञानं किं सुप्तस्य किं वा यस्यकस्यचित् । आद्ये स्वपन् प्रबुद्धः स्यात् । न द्वितीयः, परस्य संवित्तेः । परेण नरेण प्रत्यक्षेण ज्ञातुमशक्यत्वात् । परस्य यथाकथञ्चित् ज्ञानमस्तीति चेन्न । परमाणूनामपि यथाकथञ्चिज्ज्ञानमस्तीति निषेधप्रसङ्गात् । तस्मादभावोऽङ्गीकर्तव्यः । विमोक्षप्रमाणम् आत्मा

कदाचिद् विशेषगुणशून्यः अनित्यविशेषगुणत्वात् पार्थिवपरमाणुव-दिति नांशेन व्यभिचारः । तत्रापि (क?त)था साधनात् ।

श्रीमत्काश्यपदर्शनामरतरुप्रोद्यत्प्रमामञ्जरी-
सञ्जातो जगति प्रतीतिमतुलामासादयन्नादरात् ।
विद्वद्वृन्दमधुव्रतैरतितरामासेव्यमानः सदा
जीयादेष मनोरमः परिमलप्रौढप्रमोदप्रदः ॥

Colophon :

इति तार्किकचक्रवर्तिसर्वदेवसूरिविरचितायां प्रमाणमञ्जर्या-मभावपदार्थः समाप्तः ॥

यज्ज्ञानात् सर्वजीवानां संसारो विनिवर्तते ।
नमः सर्वज्ञरूपाय विष्णवे परमात्मने ॥
॥ शुभं भूयात् ॥

Author—Tārkikacakravartti Sarvadevasūri.

Remarks—The seven *Padārthas* are defined from the logical point of view.

---

## ॥ पदार्थतत्त्वनिर्णयः ॥

No. 612 B. PADĀRTHATATTVANIRṆAYA.

C. O. L. No. 1699 B.

Substance—Palm leaf. Size—14″ × 1¼″. Leaves—60. 6 lines per page and 51 letters per line. Script—Malayāḷam. No. of Granthas—1150. Incomplete.

Owner—Same as No. 612 A.

Subject—Description of *Padārthas* according to the *Advaita* philosophy.

Beginning :

श्रीः ।

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ॥

प्रणम्य विश्वसाक्षिणं गुरूंस्तदात्मनस्तथा ।
पदार्थतत्त्वनिर्णयः प्रवक्ष्यते प्रबोधकृत् ॥

शिष्टाचारप्राप्तेष्टदेवतागुरुनमस्कारच्छलेन प्रारब्धग्रन्थार्थं तत्प्रयोजनं चाविष्करोति–प्रणम्येति । विषयप्रयोजनकथनेनार्थात् सम्बन्धोऽधिकारी च दर्शितः । विश्वस्य साक्षी विश्वसाक्षी अथवा विश्वश्चासौ साक्षी चेति विग्रहः ।

End :

लक्षणाच्चानुमानविशेषाद् द्रव्याद्यसिद्धेः न पदार्थनियमः सिद्धः । एतेन षट्पदार्थान्तर्भूतषोडशपदार्थेत्थंभावोऽपि व्याख्यातः । अथ पदार्थेतरेतराभावरूपो भेदो व्यवहारो वा लक्षणार्थ इति मतम् , तन्न । अभावमात्रस्य व्यवहारमात्रस्य वा साध्यत्वाद्विशिष्टस्य लक्षणसाध्यतापत्तेः । किञ्चेतरेतराभावस्य

Colophon :

॥ इति पूर्वपक्षपरिच्छेदः ॥

Author :

Remarks—This work is divided into two parts Pūrvapakṣa and Siddhānta. The first half dwells at length on the Nyāya, Vaiśeṣika and Mīmāmsa systems of philosophy whereas the second half refutes them preparatory to the establishment of Advaita philosophy.

## ॥ वैशेषिकतन्त्रवस्तुनिर्णयः ॥

No. 612 C. VAIŚEṢIKATANTRAVASTUNIRṆAYA.

C. O. L. No. 1699 C.

Substance—Palm leaf. Size—14″ × 1¼″. Leaves—8. 6 lines per page and 51 letters per line. Script—Malayāḷam. No. of Granthas—175. Complete.

Owner—Same as No. 612 A.

Subject—The determination of six substances from the Vaiśeṣika point of view.

Beginning:

मध्येसभमनुस्मृत्य तेजस्ताण्डवलक्षणम् ।
वैशेषिकस्य तन्त्रस्य क्रियते वस्तुनिर्णयः ॥

अभिधेयाः पदार्थाः षडपवर्गः प्रयोजनम् ।
तेन तस्याभिसम्बन्धः कार्यकारणलक्षणः ॥

द्रव्यं तत्र गुणः कर्म सामान्यं च परापरम् ।
विशेषः समवायश्च षट् पदार्थाः प्रकीर्तिताः ॥

भूजलाग्निमरुद्व्योमकालदिक्चित्तचेतनाः ।
नव द्रव्याणि लक्ष्यन्ते स्वात्मजारम्भकत्वतः ॥

End:

उत्पत्तिमत्त्वाद् भूम्यादि कुम्भवत् कर्तृपूर्वकम् ।
स हि कर्त्ता समस्तस्य चन्द्ररेखावतंसकः ॥

उदर्कविलसैस्तर्कैरतर्क्यैश्वर्यमीश्वरम् ।
अन्येऽग्निहोत्रमिच्छन्ति न गच्छन्ति परां गतिम् ॥

तस्यानुग्रहमात्रेण सम्यग् ज्ञानं प्रवर्त्तते ।
तेनापवर्गः सर्वेषां सिध्यत्येव न संशयः ॥

Colophon:

वैशेषिकस्य तन्त्रस्य प्रणीतस्य महर्षिणा ।
नृसिंहनामधेयेन कृतोऽयं वस्तुनिर्णयः ॥

इति वैशेषिकतन्त्रवस्तुनिर्णयः ॥

Author—Nṛsimha.

Remarks—The whole work is in verse. The doctrines enunciated in each science are described here most vividly.

## ॥ लक्षणमाला ॥

### No. 612 D. LAKṢAṆAMĀLĀ.

C. O. L. No. 1099 D.

Substance—Palm leaf. Size—14"×1¼". Leaves—8. 6 lines per page and 51 letters per line. Script—Malayāḷam. No. of Granthas—175. Complete.

Owner—Same as No. 612 A.

Subject—Description of the similarities and dissimilarities in the *Padārthas*.

Beginning :

श्रीः ।

लक्षणमाला ।

तुष्टेर्मोचयतो बन्धादतुष्टेर्बध्नतः पुनः ।
कारागारमिदं विश्वं यस्य नौमि तमीश्वरम् ॥

तत्त्वानुभूतिः प्रमा । तत्त्वेत्यतत्त्वधियां तर्कसंशयविपर्यासानां निरासः । अनुभूतिरिति स्मृतेः । सा नित्यानित्या चाश्रयभेदात् । तत्र नित्याया आश्रयः प्रमाणम् । अक्षूत्रयच्च 'आप्तप्रामाण्यादि'ति । आभाष्ययच्च 'आप्तानां प्रमाणता साक्षात्कृतधर्मता' इति । अनित्यायाः पुनः प्रमायाः साधकतमं प्रमाणम् ।

End :

अन्यतरनिग्रहास्फुरणे स्वयमेव कथाविच्छेदो विक्षेपः । सपक्षदोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा । असाधने सदुत्तराप्रतिपत्तिः पर्यनुयोज्योपेक्षणम् । अतन्निग्रहस्थाने तन्निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः । प्रदेशान्तरस्थितसिद्धान्तविरुद्धोऽपसिद्धान्तः । हेत्वाभासाश्च यथोक्ताः ।

यस्माज्जातं जगत् कार्यं यन्निमित्तं च लीयते ।
तस्मै सर्वज्ञरूपाय नमामि परमात्मने ॥

Colophon :

लक्षणमाला समाप्ता ।

Author :

Remarks—This work aims at depicting the characteristics of *Padārthas* from the *Vaiśeṣika* point of view.

---

## ॥ गुरुसम्मतपदार्थाः ॥

## No. 612 E. GURUSAMMATAPADĀRTHA.

C. O. L. No. 1699 E.

Substance—Palm leaf. Size—14″ × 1¼″. Leaves—15. 6 lines per page and 51 letters per line. Script—Malayālam. No. of Granthas — 275.

Owner—Same as No. 612 A.

Subject—Description of *Padārthas* according to the school of Guru.

Beginning :

श्रीः ।

गुरुसम्मतपदार्थाः ।

द्रव्यजातिगुणाः कर्म संख्यासादृश्यशक्तयः ।
समवाय इतीमेऽष्टौ पदार्था गुरुसम्मताः ॥

तेषां लक्षणमुच्यते । तत्र सामान्यतोदृष्टानुमानं लक्षणवचनस्यार्थः । पृथिव्यादिमनोऽन्तं गुणादिभ्यो भिद्यते तेभ्यो व्यावृत्तधर्मकत्वात् । यद्यतो व्यावृत्तधर्मकं तत् ततो भिद्यते । यथा शीताद् व्यावृत्तधर्मकमुष्णम् ।

End :

संयोगव्यतिरिक्तत्वे अवयवावयव्यादयः परस्परमसम्बन्धसंयोगरहिताः । तद्व्यापकरहितत्वाद् यदित्थं तत्तथा यथा धूमव्यापकाग्निरहितो महाह्रदो धूमरहित इति । समवायश्चानेकः । समवायिनोरेकस्योभयोर्वा अनित्यत्वे अनित्यः । नित्ययोर्नित्य इति ।

Colophon :

पदार्थाः समाप्ताः ।

Author :

Remarks—The introductory verse proves that 8 substances are dealt with herein.

---

## ॥ प्रमाणमञ्जरी ॥

### No. 613 A. PRAMĀṆAMAÑJARĪ.

C. O. L. No. 21 A.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—121. 17 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—275.

Owner—C. O.

Subject etc.—Same as No. 612 A.

---

## ॥ पदार्थतत्त्वनिर्णयः ॥

### No. 613 B. PADĀRTHATATTVANIRṆAYA.

C. O. L. No. 21 B.

Substance—Paper. Size — $13\frac{1}{2}'' \times 8''$. Pages—121. 15—16 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1150.

Owner—C. O.

Subject etc.—Same as No. 612 B.

## ॥ वैशेषिकतन्त्रवस्तुनिर्णयः ॥

No. 613 C. VAIŚEṢIKATANTRAVASTUNIRṆAYA.

C. O. L. No. 21 C.

Substance—Paper. Size—13″ × 8½″. Pages — 19. 15—16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—175.

Owner—C. O.

Subject etc.—Same as No. 612 C.

## ॥ लक्षणमाला ॥

No. 613 D. LAKṢAṆAMĀLĀ.

C. O. L. No. 21 D.

Substance—Paper. Size—13½″ × 8″. Pages — 18. 16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas —175.

Owner—C. O.

Subject etc.—Same as No. 612 D.

---

## ॥ गुरुसम्मतपदार्थाः ॥

No. 613 E. GURUSAMMATAPADĀRTHA.

C. O. L. No. 21 E.

Substance—Paper. Size—13½″ × 8″. Pages — 28.

16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas — 275.

Owner—C. O.

Subject etc.—Same as No. 612 E.

---

## ॥ प्रमाणव्यवस्था ॥

## No. 614. PRAMĀṆAVYAVASTHĀ.

C. O. L. No. 528.

Substance—Paper. Size—11″ × 9½″. Pages — 4. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—50.

Owner—C. O.

Subject—Explication of Pramāṇas.

Beginning :

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥

प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥

प्रसिद्धानां प्रमाणानां लक्षणोक्तौ प्रयोजनम् ।
तद्व्यामोहनिवृत्तिः स्याद् व्यामूढमनसामिह ॥

End :

अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ।
एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः ॥

नयानामेकनिष्ठानां प्रवृत्ते श्रुतवर्त्मनि ।
सम्पूर्णार्थविनिश्चायी स्याद्वादश्रुतमुच्यते (?) ॥

प्रमाताखाद्यनिर्भासी कर्ता भोक्ता विवृत्तिमान् ।
स्वसंवेदनसंसिद्धो जीवः क्षित्याद्यनात्मकः ॥

प्रमाणानां व्यवस्थेयमनादिनिधनात्मिका ।
सर्वसंव्यवहर्तॄणां प्रसिद्धापि प्रकीर्तिता ॥

Colophon :

Remarks—The work is in verse.

---

॥ मणिप्रकाशप्रकाशः

No. 615. MAṆIPRAKĀŚAPRAKĀŚA.

Substance—Paper. Size—13¼″ × 8¾″. Pages—256. 20 lines per page and 25 letters per line. Script—Devanāgarī. No. of Granthas—4000. Incomplete.

Owner—C. O.

Subject—Explication of the Maṇiprakāśa of Rucidatta.

Beginning :

श्रीः ।

॥ मणिप्रकाशप्रकाशः ॥

विजयविजयसिद्धिं भक्तभीष्मप्रतिज्ञा-
मपि घटयितुमिच्छन्नात्तचक्रो रणाग्रे ।

शमयतु दुरितं मे शौरिरस्याहुरार्या
निखिलभुवनरक्षादीनि लीलायितानि ॥

शैलतुङ्गस्तनीपादपरिचर्यापरम्पराम् ।
शीलयामि शिलोत्तुङ्गयशसे श्रेयसेऽपि च ॥

प्रत्यूहतूलजालप्रबलानललीलनतिनुतिस्मरणौ ।
बन्धूकबन्धुकान्तेः सिन्धुरवदनस्य शीलये चरणौ ॥

बादरायणिवंश्येन महोपाध्यायज्वना ।
प्रकाश्यते प्रकाशोऽयं मणेः सोऽपि क्वचित्क्वचित् ॥

ननु मणिकृतानुमानं निरूप्यत इति प्रतिज्ञायते । तत्प्रति(ज्ञा) चेदानीमसंगता । प्रतिज्ञा हि स्वग्रन्थे शिष्यप्रवृत्त्यर्था तत्प्रतिपाद्यविषयनिर्देशार्था । सा च ग्रन्थादावेव कर्तव्या । ननु ग्रन्थादावेवाथ जगदेव दुःखपङ्केत्यादिन्यायशास्त्रस्य विषयं षोडशपदार्थमुक्त्वा तेष्वभ्यर्हितत्वात् प्रमाणतत्त्वमत्र ग्रन्थे विविच्यत इति सामन्यतः प्रतिजानतापि तेन उत्तरत्र तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदादिति विभागवचनादनुमानस्य सा कृतैवेति चेत्, एवं तर्हि इदानीं तत्प्रतिज्ञा किमर्थेत्याशङ्क्याह—शिष्यावधानायेति ॥

End :

इयता केवलान्वयिनः साध्यस्याभावान्न तस्य पार्थक्यमित्याशङ्क्य निराकृतम् । इदानीं तस्य प्रमाणत्वमेव न सम्भवतीति शङ्कते—तथापीत्यादिना । तत्र सन्देहः किं शब्दोऽभिधेयो नवेति पक्षविशेष्यकः उताभिधेयत्वं शब्दवृत्ति न वेति साध्यविशेष्यकः । आद्य आह—सन्देहाभावादिति । अभावकोट्यप्रसिद्धेरिति भावः । द्वितीये किमनुमानमपि तथा, उ १ तत्पक्षविशेष्यकम् । द्वितीय आह

न प्रमेयेति । आद्यमतीयमनूद्य दूषयति— प्रमेयत्वपक्षके चास्ति-
कत्वेऽपि अत्रास्तित्वस्य केवलान्वयित्वात्कथमन्वयस्य ... ...

Colophon :

इति व्याप्तिवादः समाप्तः ।

Author—Mahopādhyāya Vaidyanātha Dīkṣita.

Remarks—The following verses,

"शास्त्रदृष्टिर्मया प्राप्ता यत्कृपादृष्टिलेशतः ।
तं वन्दे वैद्यनाथाख्यमस्मालप्पैसुतं गुरुम् ॥

बादरायणवंश्येन भिषग्राजविपश्चिता ।
प्रकाश्यते प्रकाशोऽयं मणेः सोऽपि क्वचित् क्वचित् ॥

इति प्रतिज्ञा गुरुणा कृता सा न समापिता ।
तां समाप्तुं समारेभे तार्क्ष्यनारायणः सुधीः ॥"

show that the supplementary portion of the work was written by the author's disciple Tārkṣya Nārāyaṇa. The author flourished in the 17th century A. D. His native place was Rudra Gaṅgā. (Vide Nos. 6221 and 6227, p. 4561 DCSMT. Vol. XI.)

## ॥ मणिसारः ॥

## No. 616. MAṆISĀRA.

C. O. L. No. 105.

Substance—Paper. Size—$13\frac{3}{8}'' \times 8\frac{1}{2}''$. Pages—383. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—4100. Incomplete.

Owner—C. O.

Subject—A thorough injury into the principles of Nyāya.

Beginning :

श्रीः ॥ मणिसारः (गोपीनाथमिश्रकृतः) ।

तदेवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिरिति प्रेक्षावतामनुमानमवश्यमादरणीयमेव । न च श्रुतित एव भगवत्सिद्धिरित्यनुमानं कुतः समादरणीयमिति वाच्यम् । श्रुतेरर्थान्तरपरतयापि नेतुं शक्यतया तन्मात्रान्निश्शङ्कज्ञानानुत्पत्तेः । तस्मादनुमानेनावश्यं तत्माहात्म्यमादरणीयमेव ।

End :

विग्रहानुशासनस्य च तत्र समानार्थताकथनार्थत्वात् । दधि पश्येत्यादौ तु लुप्तद्वितीयास्मरणस्य पूर्वमेव व्यवस्थापितत्वात् । अन्यथा क्रियाकर्मभावेनान्वयेऽपि विभक्तिं विना घटः कर्मत्वमित्यत्रैव नैराकाङ्क्ष्यापातात् । समासे तु विभक्तिं विनाप्याकाङ्क्ष...

Colophon :

Author—Gopīnātha Miśra.

Remarks—This work extends up to the definitive portion. The Anumānakhanda of this work is published as No. 35 in TSS.

॥ मणिसारः ॥

No. 617. MAṆISĀRA.

C. O. L. No. 282.

Substance—Paper. Size—$13\frac{3}{8}'' \times 8\frac{1}{4}''$. Pages—358.

29 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—4500. Incomplete.

Owner—C. O.

Subject—Same as No. 616.

Beginning :

श्रीः । मणिसारः । प्रत्यक्षखण्डः ।

हयग्रीवसुधासिन्धुहर्षहेषारवोर्मयः ।
जयन्ति वादवेलान्ताक्षिप्तबाह्यकुदृष्टयः ॥

कालिन्दी कठिना सरित् तरिरियं जीर्णा भवानक्षमो
नो जानामि तरीतुमस्मि वनिता यास्यामि पारं कुतः ।
इत्युक्त्वा विमुखीमिव स्मितमुखीं धृत्वाञ्चले चञ्चले
नावं प्रापयते शनैर्विहसते कृष्णाय तुभ्यं नमः ॥

नि(र्ग)लितं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्ततस्तनुते ॥

तत्र सर्वशिष्टपरिगृहीतमसन्दिग्धफलं मङ्गलमादौ निरूप्यते । अलौकिकाविगीतशिष्टाचारानुमितेन "समाप्तिकामो मङ्गलमाचरेदि"ति विधिना मङ्गलं समाप्तिफलकं समाप्तीतराफलकत्वे सति सफलकत्वादित्यनुमानेन च मङ्गलस्य समाप्तिसाधनताबोधनात् मङ्गलं समाप्तिहेतुः ।

End :

यत्तु किञ्चेन्द्रियेत्यादिबाधकमुपन्यस्तं, तदपि न । सविकल्पकाभावेनैव निर्विकल्पकस्याप्यभावानुमानात् । न च सविकल्पकस्य

निर्विकल्पकव्यापकत्वे मानाभावः । सविकल्पकाभाववति निर्विकल्पकसामग्र्यपि फलविशेषाभावे न । न चैवम् तस्माद् ज्ञानत्वं सविकल्पकभिन्नवृत्ति सकलज्ञानवृत्तित्वात् इत्यनेकसद्भावाद् बाधकसद्भावाच्च निर्विकल्पकमस्तीति स्थितम् ॥

Colophon :

निर्विकल्पकवादः समाप्तः ॥

Author—Same as No. 616.

Remarks—This work ends with the discussion on Nirvikalpaka Pratyakṣa.

## ॥ मुक्तावलीप्रकाशः ॥

## No. 618. MUKTĀVALĪPRAKĀSA.

C. O. L. No. 101.

Substance—Paper. Size—13½″ × 8½″. Pages—333. 21 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—4300. Complete.

Owner—C. O.

Subject—A commentary on the Muktāvalī.

Beginning :

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवाम्स्याम्बुजात् ।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥

तत्र तावद् भाषापरिच्छेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथपञ्चाननो निर्विघ्नपरिसमाप्तये कृतस्य ईश्वरनिर्देशरूपमङ्गलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निबन्धनं कुर्वन् शिवं प्रार्थयते — चूडामणीकृतेति । लीलेति ।

End :

अत्र च स्वकर्तृकत्वस्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासाहितभेदप्रत्यवायस्य प्रतिबन्धकस्य सत्त्वान्न व्यक्तिभेदो विषयः, किन्तु सजातीयभेदो विषय इति भावः ।

भानुं प्रणम्य परिभाव्य च शास्त्रसारं
मुक्तावलीकिरण एव पितृप्रविष्टः ।
सद्युक्तिभिर्दिनकरेण करेण सोऽयं
नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु ॥

मुक्तावलीप्रकाशोऽयमज्ञानतिमिरापहः ।
तेन सन्तोषमायातु नीलकण्ठः सतां प्रियः ॥

Colophon :

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्यसुतश्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितसिद्धान्तमुक्तावल्याः श्रीमहादेवभट्टकृतो मुक्तावलीप्रकाशः समाप्तः ।

समाप्तोऽयं ग्रन्थः ।

Author—Śrī Mahādeva Bhaṭṭa.

Remarks—The author was the son of Bālakṛṣṇa and disciple of Nīlakaṇṭha. He is reputed for his consummate scholarship. The composition of this work must have been

done in collaboration with his father. Another appellation of the author was Bhaṭṭadinakara. The work is identical with No. 3955, DCSMM. Vol. VIII.

—∞∞—

## ॥ मुक्तावलीप्रकाशव्याख्या (विषमार्थप्रकाशिका) ॥

## No. 619. MUKTĀVALĪPRAKĀŚAVYĀKHYĀ.

### Viṣamārthaprakāśikā.

C. O. L. No. 237.

Substance—Paper. Size—14″ × 8½″. Pages—123. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1300. Complete.

Owner—C. O.

Subject—A commentary on the Muktāvalīprakāśa.

Beginning:

विशिष्टवाचकपदानामिति। पृथग्विशेषणपदसमभिव्याहृताविशिष्टवाचकपदं यत्र तत्र विशेष्यमात्रपरत्वमिति व्याप्यव्यापकभावेन विशिष्टवाचकपदस्य विशेष्यमात्रपरत्वमिति भावः। साधनादिति। विशेषाभावकूटस्य सामान्याभावव्याप्यत्वादिति भावः। व्यतिरेकव्यभिचार इति।

End:

तथा चोत्तरक्षणवृत्तित्वविशिष्टस्यैव स्वनाशकतया नोक्तकार्यकारणभावे व्यभिचार इति भावः। प्रतिबन्धकस्य सत्त्वादिति। एककालीनस्वकर्तृकत्वस्वाभिन्नकर्तृकत्वयोरविरोधे विभिन्नकालीन-

योस्तयोर्विरोधेन स्वकर्तृकत्वविशिष्टो धर्मी स्वभिन्नकर्तृकत्वस्य विशिष्टात् धर्मिणो भिन्न इति भेदावगाहिप्रत्ययस्य भेदावगाहि-प्रतिबन्धकस्य सत्त्वादिति भावः ।

Colophon :

श्रीरङ्गनाथसुधिया कृता शिष्यार्थनावशात् ।
मुक्तावलीप्रकाशस्य विषमार्थप्रकाशिका ॥

ग्रन्थः समाप्तः ।

Author—Ranganātha.

Remarks—Same as No. 607 A.

## ॥ मुक्तावलीव्याख्या (प्रभा) ॥

### No. 620. MUKTĀVALĪVYĀKHYA. (Prabhā.)

C. O. L. No. 2406.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—152. 8 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—3600.

Owner—Gopāla Śāstrī, Shencotta.

Subject—A commentary on the Muktāvalī.

Beginning :

श्रीमते दक्षिणामूर्तये नमः ।

कामाक्षीपद(पयो?पाथो)जे न्यस्ता मुक्तावलीप्रभा ।
श्रीरायनरसिंहाख्यपण्डितेन चिकीर्ष्यते ॥

तत्र प्रारिप्सितग्रन्थपरिसमाप्तिविरोधिविघ्नप्रत्यूहध्वंसनविचक्षणां परमेश्वरप्रार्थनामादौ निबध्नाति — चूडामणीकृतेति ।

End :

नच तथापि कर्णशष्कुलीविवरनाशाद् विशिष्टाभावोऽस्तु । नाशव्यवहारस्तु कथमिति वाच्यम् । स्वर्गी ध्वस्त इतिवत् विशेषणीभूतकर्णविवरनाशं विपयीकृत्य तथा व्यवहारात् । वस्तुतो घातपदस्याभावमात्रलाक्षणिकतया इन्द्रियाणामभावे स्मृतिः कथमित्येव कारिकाया अर्थ इति प्रतिभाति । चक्षुरादीनां चैतन्यं मास्त्विति । स्मरणानुपपत्तेरिति शेषः ।

Colophon :

इति मुक्तावलीव्याख्यायां प्रभायां तेजोग्रन्थः ।

Author—Rāya Narasimha.

Remarks—The author has written another commentary designated Prakāśikā on Tarkasaṅgraha Dīpikā.

---

## ॥ मुक्तावलीव्याख्या (प्रभा) ॥

### No. 621. MUKTĀVALĪVYĀKHYĀ.
(Prabhā.)

C. O. L. No. 129.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—264. 20 lines per page and 25—26 letters per line. Script—Devanāgarī. No. of Granthas—4250.

Owner—C. O.

Subject etc.—Same as No. 620.

---

## ॥ लीलावतीविलासः ॥

## No. 622. LĪLĀVATĪVILĀSA.

C. O. L. No. 1784.

Substance—Palm leaf. Size—22″ × 1½″. Leaves—88. 11 lines per page and 88 letters per line. Script—Malayālam. No. of Granthas—5324. Complete.

Owner—Nārāyaṇan Nambūri, Kiḷimaṅgalas.

Subject—A refutation of the subdivisions of the main proofs of Knowledge, Inference, Perception etc.

Beginning :

... ... श्रीगणपतये नमः । अविघ्नमस्तु ।

शिरसि वहति वेदो गौरवाद्यच्च यच्च
स्फुरति मनसि योगोद्योगभाजां कथञ्चित् ॥

.... ... ... ...
... ... भर्त्तुं सम्पूर्णगजेन्द्रभावम् ॥

अकुर्वतां स्वप्रणतिं नराणा-
मिष्टस्य दृष्टान्तमिवाममासेः ।
नमामि विघ्नाधिपति... ...
... ... .... ॥

सान्द्रोल्लसद्विशदचन्द्रिकाभा ... ... भास्वद्भिर्
दुर्लभः खल्व... ... ...

.... .... .... .... वल्लभप्रीतिवर्धनः ।
लीलावतीविलासोऽयं महादेवेन तन्यते ॥

अयमुदयनमुख्यग्रन्थमुद्रां विलोक्य
क्रियत इति हि मा गा भ्रातरस्मिन्नवज्ञाम् ।

.... .... .... ....

ग्रन्थव्याख्यातिरेकेण प्रायः किञ्चिन्न बध्यते ।
करस्थेऽपि प्रमेयाब्धौ ग्रन्थविस्तरभीरुणा ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयागमनार्थम् विगीतशिष्टाचारपरम्पराप्राप्तमिष्टदेवतानमस्कारमादौ करोति--नाथ इति । सृजति जनयति । किम् । जगत् । इह जगच्छब्देन प्राणिवर्गो विवक्षितः । तदन्यत्र परमनिर्वृतेरसम्भवात् । अथवा कार्यमात्रं जगच्छब्दार्थः । परमनिर्वृतिस्तु प्राणिविश्रामहेतुत्वात् संहृतिरिति व्याख्येयम् ।

End :

स चात्र पूर्वपरभावात्मा प्राक् प्रध्वंसाभावसाहित्यमेव। यत्करणाभ्यामभावनिरूपणादित्याशङ्क्याह—अत एवेति । योग्यप्रतियोगिनिरूप्यो ह्यभावो नाधिकरणनिरूप्यः । अन्यथा आलोकाभावप्रसङ्गादिति भावः । अथवा न वर्णक्रमः श्रोत्रगोचरः । किन्त्वनुमाना- ...प्रमाणान्तरोति। सूर्यक्रियाणां हि परस्परभावसाहित्यमेव। पौर्वापर्यतदवच्छिन्नकालयोगत्वञ्च तदन्येषाम् । तच्च कुतश्चिल्लिङ्गादवगम्यते इत्यर्थः ॥

Colophon :

॥ शब्दः ॥

इति श्रीमदगनग्रामपञ्चवटीकश्रीधरदीक्षिततनयपदवाक्य-

प्रमाणनिपुणतार्किकतिलकत्रिणंत्रमहादेवभट्टोपाध्यायविरचिते लीलावतीविलासे द्रव्यपदार्थः समाप्तः ।

Author—Mahādeva.

Remarks—The Ms. is much damaged.

---

## ॥ वैशेषिकपदार्थतत्त्वनिरूपणम् ॥

## No. 623. VAIŚEṢIKAPADĀRTHATATTVA-NIRŪPAṆAM.

C. O. L. No. 841.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Pages—157. 8—10 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—3650. Incomplete.

Owner—Harīśvaran Padmanābhan Nambūri, Ettumanūr.

Subject—Same as No. 611.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमत्कणादाय नमः ।

इह खलु मोक्षसाधनमात्मतत्त्वज्ञानमामनन्ति । तच्च पदार्थतत्त्वज्ञानाधीनम् । पदार्थतत्त्वं च पदार्थानां संगृह्य कथनं विना न सुखेन ज्ञातुं शक्यमिति संगृह्य कथनं चिकीर्षुः तस्याविघ्नेन परिसमाप्त्यर्थं शिष्टाचारानुमित'समाप्तिकामो मङ्गलमाचरेदि'त्याकारकश्रुतिबोधित-

कर्तव्यताकमाचार्यप्रणातिलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति---श्रीमदिति ॥

End :

उक्तप्रत्यक्षापत्तेर्वारणाय तस्यावश्यकत्वात्। किन्तु गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसम्बन्धसिद्धिरिति । न चाधाराधे.... .... .... ....

Colophon :

इति विशेषणनिरूपणम् ।

Author :

Remarks—The Ms. begins on *Maṅgalavāda* and expounds other topics akin to Nyāya philosophy.

---

॥ शाब्दनिर्णयः ॥

## No. 624. ŚABDANIRṆAYA.

C. O. L. No. 134.

Substance—Paper. Size—15″ × $8\frac{1}{2}$″. Pages — 82. 18 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas — 900.

Owner—Valia Rāja, Edappally.

Remarks—The work is published as No. 53 in TSS.

|| शिरोमणिव्याख्या ||

No. 625. ŚIROMAṆIVYĀKHYĀ.

C. O. L. No. 30.

Substance—Paper Size—13½"×8½". Pages—330. 10 lines per page and 22 letters per line. Script—Devanāgari. No. of Granthas — 3900. Incomplete.

Owner—C. O.

Subject—A commentary on Tattvacintāmaṇidīdhiti of Raghunāthaśiromaṇi.

Beginning :

श्रीः ।
शिरोमणिव्याख्या
भवानन्दीया ।

श्रीगोविन्दपदाम्भोजनखचन्द्रमरीचयः ।
सञ्चरिष्णोस्तमस्सङ्के मम सन्त्ववलम्बनम् ॥

नमस्कृत्य गुरून् सारं निगूढं मणिदीधितौ ।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाश्यते ॥

ओं नम इति । परमात्मने सर्वापेक्षयोत्कृष्टात्मने नमः । उत्कर्षश्च जगतः उत्पत्तिस्थितिलयकर्तृत्वम् । एकरूपस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वम्। तत्र हेतुमाह---ओं नम इति । ब्रह्म-

विष्णुरुद्रात्मकायेत्यर्थः । ओङ्कारघटकाकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात् । तस्य च नमस्कार्यताप्रयोजकरूपान्तरं दर्शयति— सर्वेति ।

End :

ताद्दशानुत्पत्तिकत्वेति । वह्निसम्बन्धाभावस्येति । वह्नेः कारणत्वग्रहात् तत्सम्बन्धाभावप्रयुक्तमवश्यं धूमानुत्पत्ति...तत्र सम्बन्धान्तरस्यानुपस्थितत्वाद् गौरवाच्च । संयोगात्मकसम्बन्धाभावस्यैव तत्प्रयोजकत्वं कल्प्यत इत्यर्थः । ताद्दशसम्बन्धाभावस्यैव सामानाधिकर..

Colophon :

इति श्रीभवानन्दवागीशभट्टाचार्यविरचितः सहचारग्रन्थः समाप्तः ।

Author—Bhavānanda Vāgīśa Bhaṭṭācārya.

Remarks—This transcript ends with the explication of invariable concomitance. The work is noticed under Nos. 6163—6168, DCSMT. Vol. XI. Bhavānanda flourished in the beginning of the 17th century A. D. (Vide p. 4557, DCSMT. Vol. XI).

---

## ॥ सामान्यनिरुक्तिव्याख्यानम् (न्यायरत्नम्) ॥

### No. 626. SĀMĀNYANIRUKTIVYĀKHYĀNAM.

(Nyāyaratnam)

Substance—Palm leaf. Size—17″ × 1¼″. Leaves—92.

8 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—750.

Owner—Harihara Iyer Nārāyaṇa Aiyar, Veccūr.

Subject—Definitions of fallacies in general.

Beginning:

उद्देश्यवाचकपदस्य पूर्वनिपातनियमेन यद्विपयकत्वेनेति वाक्ये उद्देश्यवाचकस्य विरोधित्वपदस्य परत्र .... .... .... र्वत्र योजनाया आवश्यकत्वाद् ज्ञानस्येत्यस्यापि यद्विपयकत्वेनेति पदात् प्राग्योजनायाः कर्तुं शक्यत्वात्। तथा चानु.... .... त्वेन तत्त्वमिति योजनायाः स्वारस्यभङ्गाभावात् ।

End:

अधिकरणविकासकतयेति। तद्धर्मावच्छिन्ननिरूपितत्वस्येत्यादिः। अधिकरणानां विषयितानां विकासकतया। तथाच तत्त....शिता-न्यतमविषयतानिरूपकतावच्छेदकधर्मवत्त्वमेव लक्षणम्। विषयितायां तत्तद्धर्मावच्छिन्ननिरूपितत्वं परिचायकमात्रम्। तेन तत्तद्धर्मवत्त्वमा ...स्यैव लक्षणत्वसंभवे शेषवैयर्थ्यशङ्कानवकाश इति भावः।

Colophon:

विदुषां कर्णभूषायैरघुनाथेन निर्मि ...।
...न्यायरत्ने सामान्यनिरुक्तिः पूर्णतामगात्॥

इति मीमांसान्यायशास्त्रश्रीमद्रामचन्द्राचार्यशिष्यस्य पर्वते-त्युपनामरघुनाथस्य कृतौ न्यायरत्नाभिधायां गादाधरीप-क्षवादटिप्पण्यां सामान्यनिरुक्तिः संपूर्णा। हरिः ओं।

श्रीसाम्बशिवचरणारविन्दाभ्यां नमः। श्रीशिवाय परमगुरवे नमः।

Author—Raghunātha Śiromaṇi.

Remarks—The leaves after the 48th are shorter in size. The edges of leaves at the beginning and end are much injured.

---

## ॥ ज्योतिषम् ॥

### ॥ अंशकफलविचारः ॥

### No. 627 AṂŚAKAPHALAVICĀRA.

C. O. L. No. 119.

Substance—Paper. Size—$10\frac{3}{4}'' \times 8\frac{3}{4}''$. Pages — 13. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—125. Complete.

Owner—C. O.

Subject—The effects of planetary movements.

Beginning:

गुरोरपि च संवाद इष्टदैवतवन्दितम् ।
कलिवाक्यानि लग्नं च सूर्याद्येषु ग्रहस्फुटम् ॥

तस्मात् कलिदिनं प्रोक्तं मन्दगुरुत्रर्क(?)तद्दिनम् ।
वारताराद्दिनाड्यश्च पक्षभेदस्तिथिः स्मृतः ॥

करणक्रीयवेलेन्द्रभिलाषा पुनः शृणु । ?
योनिभेदं गणं चैव मृगं ഋക്ഷവിഷങ്ങൾ ॥

द्रेक्काणाद्येषु षड्वर्गं लग्नाद्येषु ग्रहस्थितिम् ।
तस्माद् ग्रहफलं चैव योगं ഷാംശകവർഗ്ഗവും ॥

दशापहारनिर्याणमित्येते जातकक्रमम् ।
ശ്ലോകംമുൻ കൊണ്ടന്നാധം പിന്നെ രാശിയും നാമധേയവും।

End :

प्रमादी निपुणः स्निग्धः सुप्रसन्नो विमत्सरः ।
क्लेशात्मकः पण्डितश्च रेवत्यादौ तु जायते ॥

चोरः कान्तवपुः कामी दृढचित्तस्सुदारुणः ।
अजितात्मा मृदुश्चैव द्वितीयांशे तु जायते ॥

कुटिलः कुमतिश्चैव पिशुनः पापचेष्टकः ।
उदारो निर्धनश्चैव तृतीयांशे तु जायते ॥

कुलान्तकः शुचिर्धीरः सत्यवादी विचक्षणः ।
शूरो रिपुविनाशी च रेवत्यन्ते तु जायते ॥

Colophon :

ഇവ അംശകഫലം

Author :

Remarks—This is probably a Malayāḷam treatise on astrology as the first 10 verses and the last 12 lines are couched in pure Malayāḷam. But the portion relating to the effect of the planetary movements is composed in Sanskrit. Just after the colophon, a verse beginning with "द्विग्रचापस्य" and its commentary occur.

## ॥ अगणितग्रहचारः ॥

### No. 628. AGAṆITAGRAHACĀRA.

C. O. L. No. 280.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—384. 18 lines per page and 10 letters per line. Script—Devanāgarī. No. of Granthas—2000.

Owner—C. O.

Subject — Certain technicalities bearing upon *Grahasphuṭa*.

Beginning :

आदित्यप्रमुखान् खेटान् वन्दे लोकप्रकाशकान् ।
अगणितग्रहचारे दृश्यते राशिनिर्णयः ॥

शकाब्दान्नरलोकोनाद् राघवैर्धीत्सुना कुजः ।
दिव्यलोकोननीलाग्रैस्तत्त्वज्ञैर्भाजिते बुधः ॥

नवलोकोनसारङ्गैर्गजैराप्ते गुरुर्भवेत् ।
हेमपुण्योनशाकाब्दात् सारवैर्गोवरैर्भृगुः ॥

यज्ञलोकोननीतांशैर्धर्मैराप्ते शनिर्भवेत् ।
तीर्थप्रियोनशाकाब्दाद् गन्धज्ञैर्भाजिते तमः ॥

End :

| | | | | |
|---|---|---|---|---|
| मकर | मासे | १३ | तमदिने | कटकराहुः ८८ |
| सिंह | ,, | १ | ,, | मिथुनराहुः ८९ |
| कुम्भ | ,, | २१ | ,, | वृषभराहुः ९१ |
| कन्या | ,, | १३ | ,, | मेषराहुः ९३ |
| मेष | ,, | ४ | ,, | मीनराहुः ९४ |

इति राहुग्रहचारः समाप्तः ।

Colophon :

अगणितग्रहचारः समाप्तः ।

Author :

Remarks—Same as No. 607 A.

॥ अङ्कणशास्त्रम् ॥

No. 629. AṄKAṆAŚĀSTRAM.

C. O. L. No. 206.

Substance—Paper. Size—9″ × 7″. Pages — 48. 14—20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 425.

Owner—C. O.

Subject—Same as No. 627.

Beginning :

व्याघ्रपादमहं वन्दे शेषांशेन समुद्भवम् ।
पुण्डरीकपुरीशस्य पदपङ्कजसंश्रयम् ॥

शृण्वन्तु मुनयस्सर्वे गुरूहं सर्वदैवतैः ।
ग्रहाणां प्रसवं चक्रं वक्ष्यामि मतिमात्रतः ॥

तारकास्सप्तविंशत्यो राशयो द्वादश स्मृताः ।
तत्रैकस्य द्विनक्षत्रं सपादं समुदाहृतम् ॥

End:

एतैः स्युस्त्वङ्कणस्थैस्तु ह्यन्यस्थाने शुभावहाः ।
इत्येवं व्याघ्रपादेन समुदीरितमीरितम् ॥

गृहप्रवेशयात्रायां बीजावापनसङ्गमे ।
अटलं शोधयेद्यस्तु अन्यमेतन्न शोधयेत् ॥

सूर्यादि गण्यते चन्द्रे नवभिर्भागमाहरेत् ।
नव त्रीणि चतुः पञ्च योगोऽयं खेचरं विदुः ॥

Colophon:

इति व्याघ्रपादोक्तनवग्रहसमयः समाप्तः ।

Author:

Remarks—The work contains four chapters.

---

## ॥ आचारसंग्रहः ॥

### No. 630. ĀCĀRASAṄGRAHA.

C. O. L. No. 238.

Substance—Paper. Size—13″ × 8½″. Pages — 34. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas — 340. Complete.

Owner—C. O.

Subject etc.—Same as No. 867, DCSMMPL.

## ॥ आचारसंग्रहः ॥

## No. 631 A. ĀCĀRASAṄGRAHA.

C. O. L No. 1864 A.

Substance—Palm leaf. Size—7⅜" × 1¼". Leaves—38. 6 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—399. Incomplete.

Owner—Brahmadattan Nambūrippad of Kūḍallūr.

Subject etc.—Same as No. 867, DCSMMPI

Remarks—The closing portion of the Ms. is worn out. The first three FF. contain the technicalities bearing upon Grahasphuṭa and the last Fol. embodies an astrological inquiry in Malayāḷam.

## ॥ आश्चर्यचूडामणिव्याख्या ॥

## No. 631 B. ĀŚCARYACŪḌĀMAṆIVYĀKHYĀ.

C. O. L. No. 1864 B.

Substance—Palm leaf. Size—7⅜" × 1⅜". Leaves—12. 5—7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—126. Incomplete.

Owner—Same as No. 631 A.

Subject—A commentary on the Āścaryacūḍāmaṇi of Śaktibhadra.

Beginning :

अहमिदानीं काञ्चित् धुरमुद्वहामि ... ... ...
का ... ... या ... वोढाः । उद्धृत्योद्धृत्य
मा... ... खिलनिगदान्नाट्यवेदं वि.... .... ...
.... ... ... प्रयोगं मुनिरपि भरत इत्य...क्तः ।
गुर्वीं पुनी.... .... ....योगात् गुरुपदे .... ....
.... .... महातीर्थस्य शिक्षा.... .... ....
... ... ... ... ... ... ... ... ... ...
गाम्भीर्यश्च परम् । स एव .... .... .... ....
.... .... .... त्यत आह — सहायसाध्याः एवमतिप्रय-
त्नसाध्याय .... .... .... .... .... ....
योजनमित्याह — जनाना.... .... .... ......

End :

आ इति स्मरणे । आश्रयमहीरुहच्च्युतम् आश्रयभूतान्महीरु-
हाच्च्युतम् । परिणामि पक्कम् । पर्णम् अलकस्य केशपाशस्य भूषणं
सम्पद्यते । जिहेमि अहमेतेनाग्निप्रवेशेन । अत्र ह्रिया शोको
लक्ष्यते । नहि नहि इति । शोको न कर्तव्य इत्यर्थः । हरिः ।

Colophon :

Author :

Remarks—The first two leaves are quite damaged. The Ms. contains a portion of the commentary on the 7th Act only. The work is published in BPM.

## ॥ ज्योतिषदीपमाला ॥

## No. 631 C. JYOTIṢADĪPAMĀLĀ.

C. O. L. No. 1864 C.

Substance—Palm leaf. Size—$7\frac{3}{8} \times 1\frac{1}{4}$". Leaves—22. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas — 270. Incomplete.

Owner—Same as No. 631 A.

Subject — Description of Muhūrta, Praśna and Gaṇita.

Beginning :

श्रीः । हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गणपतिगुरुवाणीमर्कचन्द्रारसौम्यान्
सुरगुरुसितमन्दान् राहुकेतून् വണങ്ങി ।
गणितमपि मुहूर्तं जातकं प्रश्नभागं
लघुतरमिव ചൊല്ലാം मन्दधीधारणाय ॥

राशिग्रहं स्थानविभागसंज्ञं
ഷഡ്വർഗവും താരകമെന്നിവെല്ലാം
संज्ञानुरूपेण मणिप्रवालै-
रुक्ता मया ज्योतिषदीपमाला ॥

മേടംരാശ്യാം ക്രീയകോടിയജ്ഞരാഗമെന്നും വരുമ്പോൾ
മേലേരാശിക്കിടവുമൃഷഭന്താമുരർഗോവൃഷാഖ്യം
യാമ്യൈവൃക്ഷം ജൂഉമമിഥുനം വീണയെന്നും നൃയുഗ്മം
തൃണ്ടെന്നും പേർ വരുമഥ പുനഃ കർക്കടന്തൽ കുളീരം.

End :

വെൺപക്ഷങ്ങളിലഗ്നിനാളുമുതലായ്
ക്കൊള്ളാം പതിനാലുനാൾ
കീടം വാവു വെളുത്തതും പ്രതിപദം
രണ്ടും ശശാങ്കോദയം

കൊള്ളുന്നൂണിന്നു ചൊന്നതാഗ്രയണശേ
വ്യാഴം തഥാ പത്തിലാം
കൃഷ്ണേ പക്ഷതിരന്ത്യപാദമശ്ശുഭം
സംസർപ്പമംഹസ്പതിം

ചോറൂണിലെപ്പൊഴുതു കൊള്ളുക പത്തു...ക്കം
മൂലം വിശാഖമപി കൊൾക മകം വിശേഷാൽ
ഷഷ്ഠ്യാം വ്യയേ... ... ... ... ...

Colophon :

Remarks—The work is composed in "Maṇipravāḷa form.

---

## ॥ आनन्दसुन्दरी ॥

### No. 632 A. ĀNANDASUNDARĪ.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—25. 7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 350. Incomplete.

Owner—Nārāyaṇan Nārāyaṇan Ilayatu, Vembanāṭṭillam.

Subject—Prognostication by means of ***Praśnas***.

Beginning :

श्रीमहागणपतये नमः ।

चतुर्भुजं चन्द्रकलाप्तचूडं
त्रिलोचनं कल्पकमूलसंस्थम् ।
तदुत्थरत्नौघकृताभिषेकं
नमामि मातङ्गमुखं मम्मृद्ध्यै ॥

दिवाकरशशाङ्कारबुधदेवेज्यभार्गवान् ।
रविजोग्रध्वजाचार्यान् नत्वा बुद्ध्या यथा तथा ॥

प्रश्नशास्त्रं प्रवक्ष्यामि पूर्वाचारमुखोदितम् ।
समस्तसारसंकीर्णामाख्याम्यानन्दसुन्दरीम् ॥

निमित्तं शकुनं वाच्यं दर्शनं दूतलक्षणम् ।
देशं कालं नराणां तु वर्णभेदं परीक्ष्यते ॥

End :

लग्नगे धरणीपुत्रे सप्तमे भास्करीसुते ।
निधने धनेषु सौम्ये चूणेन विगमितो मृगः(?) ॥

लग्नायसप्तगे सौम्ये क्षितिजे कण्टकस्थिते ।
प्रश्ने गमिष्यति मृगो मान्धन्ते दुर्लभं वदेत् ॥

गुलिकस्थितेऽपि राशौ नवभागे वा दिशा वापि ।
मृत्युस्थराशयोर्वा मृगमृत्युकालवशात्... ॥

Colophon :

इत्यानन्दसुन्दरीकृतौ मृगयानप्रकरणे षोडशाध्यायः ।

Author—Ānandasundarī.

Remarks—This Ms. is of immense use to astrologers in general. It extends up to a portion of the 17th chapter.

---

## ॥ अष्टवर्गप्रक्रिया ॥

## No. 632 B. AṢṬAVARGAPRAKRIYĀ.

C. O. L. No. 962 B.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—23. 7 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 300.

Owner—Same as No. 632 A.

Subject—The principles to be followed in the composition of horoscopes.

Beginning :

....भिः कन्यामकरौ
शरैश्च शेषाः स्वमानगुणिताः स्युः ।
जीवारशुक्रसौ..........
वसुसप्तेन्द्रियैः क्रमाद् गुणिताः ॥

बुधसंख्यैः शेषा....
राशिग्रहवर्गणाः पृथक् कार्याः ।
राशिग्रहगुणकारैः
फलानि गुणयेत् पृथक् च तत्रैव ॥

ग्रहयुक्ते स्याद् गुणयेद्
बहुसंख्यायां फलानि गुणितानि ।

एवन्तु तानि संयोज्यं मप्त (मृद गु?भिर्गु)णयेत् पुनः ।

* * * * * * * *

* * * * * * * *

समुदायाष्टकवर्गप्रयोग उच्यते ।

വിശേഷാൽ അഷ്ടകവർഗപരവിട്ടാൽ നടേ ത്രികോണ ശോധനചെയ്ക. അതാവതു് മേടം ചിങ്ങം ധനു ത്രികോണത്തിൽ പരലുള്ളതിൽ ഏതിൽ കുറഞ്ഞുവെൻറാൽ കുറഞ്ഞതിനോടൊപ്പിച്ചുകൊൾക.

End :

പിന്നെ ഇവററിനെല്ലാററിനും ഇക്കാലത്തിൽ.........ളി .....വൻറ ഫലമാം. അഷ്ടമാധിപൻ നിൻറടത്തെ പരവും അഷ്ടമത്തിലെ പരലും തമ്മിൽ പെരുക്കി പന്ത്രണ്ടിൽ കഴിച്ചു മേടം മുതലായി എണ്ണിച്ചെൻറു പററിയ മാസം മരണത്രികോണമാവിതുമുണ്ടു്. സമുദായത്തിലെ ലഗ്നത്തിലേതും അഷ്ടമത്തിലേതും പരലെത്രയൊണ്ടെൻറാൽ അത്ര പരമായുഃ

Colophon :

ഇങ്ങനെ അഷ്ടവർഗപ്രക്രിയ പാഴിയൂരയിക്കളം സമ്പ്രദായം.

Author :

Remarks---The Ms. begins with a short account of the affinity of a weapon and its possessor. No continuity maintained seen with regard to the arrangement of leaves.

## ॥ प्रश्नानुष्ठानपद्धतिः ॥

No. 632 C. PRAŚNĀNUṢṬHĀNAPADDHATI.

C. O. L. No. 962 C.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—28. 7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 632 A.

Subject—Same as No. 899, DCSMMPL.

Beginning :

... .... .... ष्यष्टमे स्थितः ।
विवाहसमयान्मृत्युं दद्यादब्दाष्टमे तयोः ॥

रिपुनीचगृहे पापो ह्यरिणा वीक्षितोऽपि वा ।
यदि पापगृहे कन्या विधवोद्यत्यसद्गृहे ॥

चन्द्रभौमौ यदा युक्तौ लग्नसप्तमयो .... ।
प्रश्नकाले यमं याति सप्तमे मासि तत्पतिः ॥

चन्द्रलग्नौ शुभांशस्थौ सजीवौ पृच्छके वदेत् ।
पापांशकगतौ तौ चेज्जीवनं न तयोर्द्वयोः ॥

End etc.—Same as No. 899, DCSMMPL.

Remarks—The Ms. is much injured. Its beginning is missing.

## ॥ आर्यभटीयम् ॥

## No. 633 A. ĀRYABHAṬĪYAM.

C. O. L. No. 1024 A.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—14. 8 lines per page and 90 letters per line. Script—Malayāḷam. No. of Granthas — 150.

Owner—Rājā of Cirakkal.

Subject etc.—Same as No. 871, DCSMMPL.

Remarks—The front Fol. contains a few verses dealing with astrological computations. The following passage 'सेव्यो दुग्धाब्धितल्पः ।' occurring after the colophon discloses the date of completion of the work according to Kali Era.

---

## ॥ सूर्यसिद्धान्तः ॥

## No. 633 B. SŪRYASIDDHĀNTA.

C. O. L. No. 1024 B.

Substance—Palm leaf. Size—7″ × 1″ Leaves—38. 9 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—550. Complete.

Owner—Same as No. 633 A.

Subject—An elaborate account of the sun and time.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सुरासुरशिरोरत्नमरी(चि?च्यु)पचिताङ्घ्रये ।
विघ्नान्धकारसूर्याय गणाधिपतये नमः ॥

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥

अल्पावशिष्टे तु कृते मयो नाम महासुरः ।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥

वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम् ।
आराधयन् विवस्वन्तं तपस्तेपे सुदुस्तरम् ॥

End :

तोययन्त्रैः कपालाद्यैर्मयूरनरवानरैः ।
ससूत्रवेणुगर्भैस्तैः सम्यक् कालं प्रसारयेत् ॥

वारतामलसूत्रातिगुज?तैलजलानि च ।
जिजानि? पांसवश्चैषां प्रयोगास्तत्र दुर्लभाः ॥

...तत्पात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि ।
षष्टिमज्जन्यहोरात्रं स्फुटयन्त्रकपालकम् ॥

नरयन्त्रं तथा साधु दिवा च. . . . . . . . साधनैः ।
प्रोक्तं कं साधनमुत्तमम् ।

रन्ध्रैरष्टादशविधैः सम्यक् तां...प्रसाधयेत् ।
ग्रहनक्षत्रवशितं ज्ञात्वा गोलात्मवान् नरः ॥

Colophon :

इति सूर्यसिद्धान्ते ज्योतिषोपदिष्टगोलाध्यायो द्वादशः ।
हरिः ।

Author :

Remarks—This work contains many highly useful doctrines such as Brāhma, Paila etc. for reading horoscopes.

---

## ॥ सूर्यसिद्धान्तः ॥

### No. 633 C. SŪRYASIDDHĀNTA.

C. O. L. No. 1024 C.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—57. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—Same as No. 633 A.

Subject—Beginning: Same as No. 633 B.

End :

मध्यक्षितिजयोर्मध्ये या ज्या सान्त्याभिधीयते ।
ज्ञेया चरदलज्या च विषुवत्क्षितिजान्तरम् ॥

कृत्वोपरि स्वकं स्थानं मध्ये क्षितिजमण्डलम् ।
वस्त्रच्छन्नं बहिश्चापि लोकालोकेन वेष्टितम् ॥

अमृतस्रावयोगेन गोलभ्रमणसाधनम् ।
गुणबीजसमायुक्तं गोलयन्त्रं प्रसाधयेत् ॥

Colophon etc.—Same as No. 633 B.

---

## ॥ गोलदीपिका ॥

## No. 633 D. GOLADĪPIKĀ.

C. O. L. No. 1024 D.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—38. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 400.

Owner—Same as No. 633 A.

Subject—Astrological science.

Author :

Remarks—This work is published as No. 49 in TSS.

---

## ॥ गोलसारः ॥

## No. 633 E. GOLASĀRA.

C. O. L. No. 1024 E.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—37. 8 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas — 450. Incomplete.

Owner--Same as No. 633 A.

Subject—An account of the position of the planets.

Beginning :

गोलाकारा पृथ्वी सर्वाधारा स्वयं निराधारा।
ज्योतिर्गोलः परितो यामेव सदा भ्रमति मा जयति ॥

विष्णुपदार्थात्यष्टचं
कादिस्वरशराभुवो दिनानि भुवः ।
युगदशमांशभवान्यथ
सूर्यादीन्दूच्चपातभगणाश्च ॥

खत्रयदन्ताम्बुधयो
यमाग्निपुष्करशरर्षिशैलशराः ।
षडहिषडङ्काकृतयो
वेदखमुनिपुष्कराङ्कशैलभुवः ॥

End :

कृत्वार्कास्तगकाललग्नलवके पड्भीं निशानाडिकां
त्यक्त्वेन्दुं कृत..क्रियं कृतकलाप्राणान्तरं दोर्गुणम् ।
याम्योदक्चरमौर्विकोनसहितं कोट्यावमस्याहत-
त्रिज्याकृत्य च लम्बकांशकहृतश्चन्द्रस्य शङ्कुः फलम् ॥

तद्वर्गोनितविस्तरार्धकृतितो मूलालयाधाहतं
भक्तं भुक्तिकलाभयांशरहितेनेन्दुप्रभाग्नङ्कुना ।
दोर्ज्या त्वत्र तुलादिगा यदि चरात् सौम्याद्विशोध्या ततः
शङ्कुर्न्यस्तविधौ धनुस्तु चरतस्त्यक्तं विशोध्यं विधौ ॥

Colophon :

इति गोलसारे प्रथमः परिच्छेदः ।

Author :

Remarks—Same as No. 607 A.

---

॥ सिद्धान्तदर्पणम् ॥

No. 633 F. SIDDHĀNTADARPAṆAM.

C. O. L. No. 1024 F.

Substance—Palm leaf. Size—7″ × $1\frac{1}{2}$″. Leaves—4. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—40.

Owner—Same as No. 633 A.

Subject—Description of the positions of the Earth and other planets.

Beginning :

श्रीमद्दामोदरं नत्वा भगवन्तं रविं तथा ।
तत्प्रसादान्मया लब्धं ज्योतिश्चरितमुच्यते ॥

कोटिघ्नरदवेदाः प्राक् कल्पे सूर्यस्य पर्ययाः ।
भूदन्तरदवेदेषु सप्ताद्र्यर्थो विधोः क्षितेः ॥

खखेषुगोगुणाष्टाश्वाग्नयश्विष्ट्यष्टशरेन्दवः ।
सप्ताग्न्येकाश्विषण्णागरसाङ्काकृतयोऽसृजः ॥

End :

अर्केन्द्वोरयनात् साम्ये लाटे मध्याच्च वैधृतः ।
द्विस्पृग्वृत्तेऽर्कभासेन्दोरर्धं भात्यतिरोहितम् ॥

स्वदृग्गोलगतिक्षेपबिम्बैर्ज्ञेयं ग्रहादिकम् ।
तन्मध्यभुक्तिसाम्ये स्यादासत्तिर्भिन्नमार्गयोः ॥

विंशत्यनुष्टुभा स्पष्टं कृतं शास्त्रमिहाखिलम् ।
दशभिर्न्यायमार्गश्च संक्षेपादेव दर्शितः ॥

Colophon :

इति गार्ग्यकेरलसद्ग्रामनीलकण्ठविरचितसिद्धान्तदर्पणं समाप्तम् ॥

शिवमस्तु ॥

Author—Nīlakaṇṭha Sutvan.

Remarks—Though the work is complete, its close is seen in a different codex. The following verse is seen in the course of the work:

"अक्षज्याविधुतारिलम्बकगुणो धूलीपरश्चाक्षत्मनो(?)
हारः शौरिमणिर्गुणस्तरुलवो दिग्भेदजातासवः ।
निर्गच्छ त्वमिति प्रभा तनुमयी शङ्कोस्तु गोलानुगे
मध्याह्ने द्विषडङ्गुलस्य तरणौ लण्डनबिलाख्यां पुरि ॥"

## ॥ आर्यभटीयम् ॥

## No. 634 A. ĀRYABHAṬĪYAM.

C. O. L. No. 621 A.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—7. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 125. Complete.

Owner—P. Vāsudeva Śarmā, Vaṭṭappaḷḷi, Śucīndram.

Subject etc.—Same as No. 871, DCSMMPL.

---

## ॥ करणपद्धतिः ॥

### No. 634 B. KARAṆAPADDHATI.

C. O. L. No. 621 B.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—14. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 634 A.

Subject—The process of discovering the movement of the planets like the Sun etc.

Author :

Remarks—This Ms. consists of nine chapters. It is published as No. 126 in TSS.

---

## ॥ सूर्यसिद्धान्तः ॥

### No. 634 C. SŪRYASIDDHĀNTA.

C. O. L. No. 621 C.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{1}{2}''$. Leaves—27. 8—10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—500. Complete.

Owner—Same as No. 634 A.

Subject—Beginning: Same as No. 633 B.

End:

कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषम् ।
ज्ञात्वा तमृषयश्चाथ सूर्याल्लब्धवरं मयम् ॥

... ... ... ... ... ... ... ... ...

स हि प्रीतो मयस्तेभ्यो ऋषिभ्यश्चरितं ददौ ।
अत्यद्भुततमयं लोके रहस्यं ब्रह्मसम्मितम् ॥

देवस्य निर्मलं चक्षुर्ज्ञात्वा साक्षाद्विवस्वतः ।
विदित्वैतदशेषेण परं ब्रह्माधिगच्छति ॥

Colophon:

इति सूर्यसिद्धान्ते चतुर्दशोऽध्यायः ।
सूर्यसिद्धान्तः समाप्तः ॥ श्रीपद्मनाभोऽवतु ॥

Author:

Remarks—This Ms. contains only the text.

---

## ॥ क्रियासंग्रहः ॥

No. 634 D. KRIYĀSAṄGRAHA.

C. O. L. No. 621 D.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—13. 9—11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 325.

Owner—Same as No. 634 A.

Subject—Astrological computation.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रद्धापुरस्सरं नत्वा ग्रहानपि गणेश्वरम् ।
श्राद्धचन्द्रादिगणनक्रियासंग्रह उच्यते ॥

नीत्वा मध्यं विलिप्तावधिकमुरुधराद्याप्तहीने ध्रुवाढ्ये
क्षि(त्वा?प्त्वा)ऽस्मिन् देशभेदं रविभुजचरयोर्दिग्वशाद्योगभेदम् ।
हृत्वा मध्यात्मभुक्त्या ननु तपरहृतं तत्तुलाजादितः स्यात्
स्वर्णं मध्ये स्वतुङ्गं त्यजतु पुनरतः पूर्णदोर्ज्यां विजह्यात् ॥

शिष्टज्यात्रिकलाहृतस्तिथिसटामासेश्वरो हारको
दोर्ज्यां नीतिहतामनेन विभजेल्लब्धं तु कोट्यां त्यजेत् ।
तां नेत्रास्यहतां हरेत्फलयुता दोर्ज्या स्ववृत्ताहता
नन्दाप्ता खलु चापिता धनमृणं केन्द्रे तुलाजादितः ॥

End :

भानुं गृह्णति पुण्यकाल उरगे मुञ्चत्यनुष्णत्विषं
तत्र स्युर्जपदानतीर्थसलिलाप्लावा महापुण्यदाः ।
ग्रस्तावस्तमितौ यदीनशशिनौ स्यातां पुनस्तद्दितौ
द(ष्टे?ष्ट्वै)वाभ्युदितौ विशुद्धिरुदिता तत्प्राङ् न भुज्यादिकम् ॥

एतदधिमासविषयम् ।

Colophon :

इति क्रियासंग्रहः समाप्तः । श्रीगुरवे नमः ॥

ഏവൂർ ദേവൻ ഇന.

Author :

Remarks—Same as No. 607 A

## ॥ गोलाध्यायः ॥

## No. 634 E. GOLĀDHYĀYA.

C. O. L. No. 621 E.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—28. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 700. Complete.

Owner—Same as No. 634 A.

Subject—Description of the planetary movements.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

सिद्धिं साध्यमुपैति यत्स्मरणतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदास्त्वलङ्कृतिरलं लालित्यलीलावती ।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे ॥

मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयेन स्वयम् ।
गोले सा विमला करामलकवत्प्रत्यक्षतो दृश्यते
तस्मादभ्युपपत्तिबोधविषयो गोलप्रबन्धोद्यमः ॥

भोज्यं यथा सर्वरसं विनाज्यं
राज्यं यथा राजविवर्जितं च ।
सभा न भातीह सुवक्तृहीना
गोलानभिज्ञो गणकस्तथात्र ॥

End :

चापान्तरस्य जीवा स्यात्तयोरन्तरसम्मिता ।
अन्यज्यासाधने सम्यगियं ज्या भावनोदिता ॥

समानभावना चैका तथान्यान्तरभावना ।
आद्यज्याचापभागानां प्रतिभागज्यकाविधिः ॥

या ज्यानुपाततः सेष्टा व्यासार्धे परिणाम्यते ।
आद्यदोःकोटिजीवाभ्यामेवं कार्यं ततो मुहुः ॥

भाव(न?ना) स्यात्तदग्रज्या इष्टव्यासदले स्फुटाः ।
स्थूलज्यानयनं पाठ्यामिह तन्नोदितं मया ॥

Colophon :

इति ज्योत्पत्तिः ।

रसगुणपूर्णमही (१०३६)समशकनृपसमयेऽभवन्ममोत्पत्तिः ।
रसगुणवर्षेण मया सिद्धान्तशिरोमणी रचिता ॥

गणितस्कन्धसन्दर्भोऽदर्भदर्भाग्रधीमतः ।
उचितोऽनुचितो यन्मे धाष्टर्यं तत्क्षम्यतां विदः ॥

ये वृद्धा लघवोऽपि येऽत्र गणका बद्धाञ्जलिर्वच्मि तान्
क्षन्तव्यं मम तैर्मया यदधुना पूर्वोक्तयो दूषिताः ।
कर्तव्ये स्फुटवासनाप्रकथने पूर्वोक्तिविश्वासिनां
तत्तद्दूषणमन्तरेण नितरां नास्ति प्रतीतिर्यतः ॥

आसीत्सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने
नानासज्जनधाम्नि विज्जलबिडे शाण्डिल्यगोत्रो द्विजः ।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः ॥

तज्ञस्तच्चरणारविन्दयुगलप्रा(तः?प्र)प्रसादः सुधी-
मुग्धोद्बोधकरं विदग्धगणकप्रीतिप्रदं सुस्फुटम् ।
एतद्व्यक्तसदुक्तियुक्तिबहुलं हेलावगम्यं विदां
सिद्धान्तग्रथनं कुबुद्धिमथनं चक्रे कविर्भास्करः ॥

प्रश्नानमून् प्रपठतो गणकस्य गोल-
कन्दोल्लसत्सरलयुक्तिशतप्रवाला ।
प्रश्नोत्तरार्थपरिचिन्तनवारिसिक्त-
मूलामला मतिलता समुपैति वृद्धिम् ॥

केचिदेनं पठिष्यन्ति प्रश्नाध्यायं च केवलम् ।
तदर्थलिखिता अत्र प्रश्नाः प्राग्गदिता अपि ॥

गोलम् ।

Author—Bhāskara, son of Maheśvara.

Remarks—A short sketch of the author's life is furnished in the colophon.

- - - -

## ॥ वञ्चिराज्यचरितसंग्रहः ॥

## No. 634 F. VAÑCIRĀJYACARITASAṄGRAHA.

C. O. L. No. 621 F.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—17. 9—11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—350.

Owner—Same as No. 634 A.

Subject—History of Travancore from the 8th century to the first half of the 11th. M. E.

हरिः । श्रीगणपतये नमः ।

Beginning :

അറിവ്

നാഞ്ചിനാട്ട അരുവാമൊഴി മുതൽ ആററങ്കൽ അത്തുതിവ
രെയും തിരുമനസ്സിലെക്ക രാജ്യമായിരിക്കുമ്പോൾ അതിൽ നാ
ഞ്ചിനാട്ട പൂതപ്പാണ്ടി മുമ്മുടി ചോളപുരം ചതുമണ്ഡലം മൂന്നുപ
കുതിആയിട്ട ദേവാലയം ബ്രഹ്മാലയം നീക്കി പകുതി൧- 2൦ഞ്ചു
പണം വീതം ആണ്ടു൧-ന ( ൦ഞ്ചു? ) പണം. പന്ത്രണ്ടു മാണ്ടുവരെയും
തിരുനാൾചേർച്ചയിൽ കണ്ടയൻപിള്ള പിരിച്ചു ഒടുക്കിവരു
മ്പോൾ നാട്ടമ്പിമാരിടെ ശല്യങ്ങൾ അധികമായിട്ടുതുടങ്ങി
സമ്മതിക്കാതെ അവരുതന്നെ മുതൽ ഒട്ടുള്ള ചണ്ടാരവകയും പില
പിന്നെപോലും കൊടുക്കാതെയും അഴിമതിചെയ്തുകൊണ്ടു.

൧, രാമവർമ്മൻ തമ്പുരാൻതിരുമനസ്സുകൊണ്ടു തൃശിനാ
പ്പള്ളിൽ എഴുന്നള്ളി അവിടെയുള്ള കാര്യസ്ഥന്മാർകണ്ടു
കർത്താക്കളും ആയിട്ട ബോധിപ്പിച്ചതിന്റെ ശേഷം നാഞ്ചി
നാട്ടിൽ ദേവാലയം, ബ്രഹ്മാലയം നീക്കി മുതലെടുത്തുവരു
ന്നതു എത്രയുണ്ടെന്നു കണക്കു തിട്ടംവരുത്തിക്കൊണ്ടുവരത്തക്ക
വണ്ണം ഉത്തരവുവന്നു. പിന്നത്തതിൽ നാഞ്ചിനാട്ടു എഴു
ന്നള്ളി നാഗരുകോവിൽ പൂതപ്പാണ്ടി രണ്ടു കരപ്പാശലിലും
കുത്തകക്കൊടുത്തു അവരേയും മുതലെടുത്തുവന്ന കണക്കിൻ
പ്രകാരം അക്കണക്കും ഏല്പിച്ചു കണ്ടു തിരുമനസ്സിലേക്ക അട്ടു
ക്കൽ സേവ(ക)നായിട്ടു പാർത്തിരുന്ന വീരവനല്ലൂർ ആറുമുകം
പിള്ളയും അമ്പലത്താട്ടു പാരപിള്ളയും നാഞ്ചിനാട്ടു കുത്തക
ഏററിരുന്ന ആളുകളെയും കൂടെക്കൂട്ടിച്ചുംകൊണ്ടു രണ്ടാമതും
തൃച്ചിനാപ്പള്ളിൽ എഴുന്നള്ളി കർത്താക്കളിടത്തിൽ കണക്കുവാ

ത്തിച്ചുകൊണ്ടുപുറത്തിന്റെശേഷം നാഞ്ചിനാട്ടുകാടമ്പിമാരിടെ വിരോധം ഇല്ലാതെ അമർച്ച വരുത്തികൊണ്ടുകനതിന പിന്നാക്കിപ്പിസ്സകാൻ ശേഖരത്തിൽ കരിമുകാൻമുതലായി ൯൱ കുതിരയും മന്നവെങ്കിടപതിനായിക്കൻ, തിരുപ്പതിനായിക്കൻ മുതലായി ൨൲൦ കാലാൾപ്പടകളും കൊടകത്തി രാമചന്ദ്രനും സുഗ്രീവനും സമുദ്രരാജാക്കളിൽ കസ്തൂരിരാജ രാമുരാജ മുതലായുള്ള രാജാക്കളിൽ ൭൦ പേരെയും വിട്ടുകൊടുത്തു.

End :

൯൱൦-ാമാണ്ടു തുലാമാസം ൨൭-നു-കഴിഞ്ഞുപോകകൊണ്ടു വൃശ്ചികമാസം ൧൭നു-മുതല്ക്കു ഉദ്യോഗത്തിനു അയ്യപ്പൻ ശങ്കരനാരായണയ്യനു ദിവാനുദ്യോഗത്തിനു നീട്ടും മുദ്രയും കൊടുത്തു നടന്നുവരുമ്പോൾ ൯൱൧-ാമാണ്ടു വൃശ്ചികമാസം ൨൫ കുറമായിട്ടു അർക്കരത്തിൽ ചാർത്തിക്കകൊണ്ടു ആമാസം ൨൨-നു മുതല്ക്കു നാരായണൻതമ്പി ദിവാനുദ്യോഗത്തിനു നീട്ടുംകൊടുത്തു നടന്നുവരുമ്പോൾ ൯൱൨ ആണ്ടു ധനുമാസം ൨൬-ദളവാ നാരായണയ്യൻ കഴിഞ്ഞുപോകകൊണ്ടു മകരമാസം ൨൭ മുതല്ക്കു ദിവാൻ നാരായണൻ രാമനു ദളവാസ്ഥാനത്തിനു നീട്ടും രാജ്യകാര്യം വിചാരിക്കുന്നതിനു ദിവാൻപേഷ്കാർ ജനാർദനരായർ വെങ്കിടരായർക്കു നീട്ടുംകൊടുത്തു നടന്നുവരുമ്പോൾ ൯൱൩-ാം ആണ്ടു മീനമാസം ൧൫- മുതല്ക്കു ദിവാൻഉദ്യോഗത്തിനു ജനാർദനരായരവെങ്കിട്ടരായർക്കുതന്നെ കല്പിച്ചു നീട്ടും കൊടുത്തിരിക്കുന്നു. ശേഷം പിന്നീടുള്ളകാര്യങ്ങൾ ഒന്നും എഴുതിക്കാണുന്നില്ല. ശുഭമസ്തു.

**Author:**

Remarks—The first 17 leaves embody a short account of Travancore, shedding considerable light on it ancient history. The next three

contain a copy of the agreement with the Perumbadappusvarūpam executed in the year 937 M. E. A copy of the deposition given by the Perumbaḍappu Rāja at Śucīndram on the 25th Karkadakam 987 M. E., is comprised in the subsequent three leaves. In the closing four leaves is seen a copy of the royal proclamation made on the 1st Makaram 984 M. E.

---

## ॥ आर्यभटीयम् ॥

## No. 635 A. ĀRYABHAṬĪYAM.

C. O. L. No. 166 A.

Substance—Palm leaf. Size—19″ x 2″. Leaves—8. 7—9 lines per page and 76 letters per line. Script—Malayalam. No. of Granthas—304. Complete.

Owner—Subrahmoṇyan Mūttatu.

Subject etc.—Same as No. 871, DCSMMPL.

Remarks—The leaves are very much damaged.

## ॥ महाभास्करीयम् ॥

## No. 635 B. MAHĀBHĀSKARĪYAM.

C. O. L. No. 166 B.

Substance—Palm leaf. Size—19″ × 2″. Leaves—15. 7—9 lines per page and 78 letters per line. Script—Malayaḷam. No. of Granthas — 550. Complete.

Owner—Same as No. 635 A.

Subject—Description or the planetary movements.

Beginning—Same as No. 902. DCSMMPL.

End :

भास्करे मिथुनपर्यवसाने
शर्वरी त्रिगुणसप्तघनी स्यात् ।
अक्षचापगणितं वद तस्मिन्
लम्बकेन सहितं विगणय्य ॥

भास्करेण परिचिन्त्य कृतोऽयं
मन्दबुद्धिपरिबोधसमर्थः ।
सम्यगार्यभटकर्मनिबन्धः
पुष्टवाक्यकरणैः समवेगः ॥

स्पष्टार्थानेककरणैश्छेद्यके ग्रहणे रवेः ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

Colophon :

इति महाभास्करीयेऽष्टमोऽध्यायः ।
इति महाभास्करीयं समाप्तम् ।

Author—Same as No. 902 DCSMMPL.

Remarks—This work in verse determines the solar and lunar eclipses from the point of view of Āryabhaṭācārya. The text, which alone is embodied herein, is divided into eight chapters.

---

## ॥ सूर्यसिद्धान्तः ॥

### No. 635 C. SŪRYASIDDHĀNTA.

C. O. L. No. 166 C.

Substance—Palm leaf. Size—19″ × 2″. Leaves—16. 8 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—628. Complete.

Owner—Same as No. 635 A.

Subject etc.—Same as No. 633 B.

---

## ॥ ग्रहणमण्डनम् ॥

### No. 635 D. GRAHAṆAMAṆḌANAM.

C. O. L. No. 166 D.

Substance—Palm leaf. Size—19″ × 2″. Leaves—3. 10 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—165. Complete.

Subject—Astrological computation for determining the position of the planets.

Beginning:

गणपतये नमः ।

जयति जगतो दिनेशः
प्रबोधकृद् यस्य भानुसम्पर्कात् ।
शशिभृगुजतारकाद्या
ज्योतिर्दीप्ताः प्रदृश्यन्ते ॥

आत्मीयवदनबिम्बं
प्रदृश्यते दर्पणेषु ×× यथा ।
तद्वद् गोले ग्रहणं
प्रदृश्यते चण्डभानुशीतांशोः ॥

विज्ञाय लघुं तन्त्रं
दृष्ट्वा गोळस्य संस्थितिं बहुशः ।
गणकानां सन्तोष-
प्रदं मया ग्रहणमण्डनं क्रियते ॥

यस्मादिन्दुग्रहणे
न संवदति सहितासिद्धोऽतः ।
इन्द्वादेरानयनं
पूर्वैः कैश्चित् प्रदर्शितं वक्ष्ये ॥

End:

दृष्ट्वा बहूपरागान्
भवेच्छुभफलाधिक्येऽरिष्टभङ्गो नचान्यथा ॥

चेष्टोच्चबलयोगार्धं दृशांशो रूपयुकरः ।
एषां करसमाजो यः समुदाय इतीरितः ॥

यदि शशिरवी तारायुग्मे द्वितीयतृतीय(कौ?गौ)
प्रथमचरमौ वांशौ प्राप्तौ क्रमाद् बलवांस्तदा ।
प्रशिथिलबलः प्राज्ञैरेकार्गलः कथितोऽन्यथा
कतिचिदथ तं दोषं वदन्त्यवन्तिषु केवलम् ॥

स्वस्वामिजीवशशिजैः सहितं विलग्नं
दृष्टं तु वा हरति शून्यविषाहिदोषान् ।
केन्द्रत्रिकोणगृहगो बलवान् शुभश्च
मासर्क्षराशितिथिशून्यभयापहारी ॥

देवेड्येन स्फीतवीर्येन दृष्टं
संयुक्तं वा सर्वकार्येष्वनिन्द्यम् ।

Colophon .

Author :

Remarks—Same as No. 607 A.

॥ जातकपद्धतिः (सव्याख्या) ॥

No. 681 B. JĀTAKAPADDHATI
with commentary.

C. O. L. No. 914 B.

Substance — Paper. Size—11″ × 8½″. Pages — 33.
20 lines per page and 20 letters per line.
Script—Devanāgarī. No. of Granthas — 400.

Owner—C. O.

Subject—Same as No. 681 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

व्याघ्रग्रामेश नेत्राण्यरुणशशधराङ्गारकैः कल्पितानी-
त्येतत्सौम्याकृतेस्तेऽखिलभुवनगुरोर्भोगिवाचार्यवृत्तेः ।
उद्यन्मन्दस्मितस्य प्रकटितभुजगालङ्कृतेर्देव भद्रं
तुभ्यं सर्वग्रहात्मन् वरदवर नमः पार्वतीवल्लभाय ॥

विद्यादाय्यप्यविद्यादं चित्रं ज्योतिर्जगद्गुरुम् ।
कैलासपुरगेहस्थं वन्दे गोविन्दनामकम् ॥

वटश्रेणीति लोकेऽस्मिन् प्रसिद्धस्य द्विजन्मनः ।
कृते विलिख्यते व्याख्या स्वल्पा जातकपद्धतेः ॥

बालप्रबोधिनीसंज्ञां सन्तः संशोधयन्त्विमाम् ।
यद्यप्युपकृतिः स्वल्पाप्यनया त्रिनयान्विता ॥

ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायाम्बुयन्त्रैः स्फुटं
तत्कालप्रभवा विलग्नसहिताः कार्यास्ततश्च ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटोपकरणैस्ते चासकृत्कर्मणा
भावाः खेटदृशोर्बलानि च ततस्तेषां विचिन्त्यानि षट् ॥

End :

किञ्च स्वेशफलोत्कराभ्यामित्यनेनैकस्य ग्रहस्य इष्टफलानि निह-
न्तु (अ)न्येषामिष्टकष्टानामपेक्षितत्वात् । सप्तसु कोष्ठद्वयपङ्क्तिषु
सर्वेषां ग्रहाणाम् इष्टकष्टफलानि प्रक्षिप्य ए( वै?कै)कस्य इष्टकष्टफले
गुणितुं शक्ये इति चोच्यते । शास्त्रान्तरे भूषादेवादिसंख्याप्येतदा-
नयनप्रकारोऽपि द्रष्टव्यः ।

Colophon :

इति बालप्रबोधिनी जानकपद्धतिव्याख्या समाप्ता ।
नारायणेन लिखितमिदं पुस्तकम् ।

श्रीगुरुभ्यो नमः । गजेशः । अक्षं तुन्दबलम् । लम्बनम् ।
തിരുവെള്ളൂ മാന്തുരപ്പൻ തുണ. കുവത്താൽ മഹാദേവൻ തുണ.

Author :

Remarks—The commentary is known as Bālaprabodhinī.

---

## ॥ जातकभावफलम् ॥

## No. 682 A. JĀTAKABHĀVAPHALAM.

C. O. L. No. 2520 A.

Substance—Palm leaf. Size—15″ × 1¼″. Leaves—14. 5 lines per page and 36 letters per line. Script — Grantha. No. of Granthas — 150.

Owner—Brahma Śrī Kāśi Vādhyār, Mahādanapuram.

Subject—Influences of planets and other heavenly bodies.

Beginning :

लग्नेऽर्केऽल्पकचः क्रियालसतनुः क्रोधी प्रचण्डानतो
मानी लोचनरूक्षकर्कशतनुः शूरोऽक्षमो निर्घृणः ।
स्फोटाक्षश्शशिभे क्रिये सतिमिरे सिंहे निशान्धः पुमान्
दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवेत् ॥

द्विपद्चतुष्पद्भोगीनष्टविभवसौख्यश्च (?) ।
नृपचोरमुषितसारः कुटुम्बके स्याद्रवौ पुरुषः ॥

विक्रान्तो बलयुक्तो विनष्टसहजस्तृतीयगे सूर्ये ।
लोकमनोभीरामः प्राज्ञो जितशत्रुपक्षश्च ॥

वाहनबन्धुविहीनः पीडितहृदयश्चतुर्थगे सूर्ये ।
पात्रगृहधान्यनाशो भवति नरः कुनृपसेवी च ॥

End :

अत्युदारोऽतिमेधावी श्रीमान् मृत्युसमन्वितः ।
नेत्ररोगी व्ययार्तश्च केतौ रन्ध्रं समाश्रिते ॥

भोगी धर्मरतः कामी कफात्मा दैवचिन्तकः ।
मन्त्रविज्ञानशीलश्च केतौ नवमसंस्थिते ॥

जनानुरागी धनवान् शिल्पवित् प्रियदर्शनः ।
सदा क्लेशी महोत्साही केतौ कर्मणि संस्थिते ॥

लोकप्रियोऽतिविख्यातः सुशीलस्साधुकर्मतः ।
बह्वायुः प्रियवाग् दीनः केतौ लाभगृहाश्रिते ॥

पुराणद्रव्यनाशश्च चपलः पतितोऽधनः ।
विदेशनिरतः कामी केतौ द्वादशराशिगे ॥

Colophon :

इति राशिभावफलं समाप्तम् ।

Author :

Remarks—The Ms. is much damaged.

## ॥ जातकालङ्कारः ॥

## No. 682 B. JĀTAKĀLAṄKĀRA.

C. O. L. No. 2520 B.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—24. 5 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—270.

Owner—Same as No. 682 A.

Subject—Same as No. 670 A.

Beginning:

लग्नेशे स्वोच्चराशिस्थे शुभग्रहनिरीक्षिते ।
कीर्तिश्रीमान्महाभोगी देहपुष्टिसमन्वितः ॥

लग्नेशो दुर्बलो यः स्यात् शुष्कराशिसमन्विते ।
कृशगात्रोष्णदेहश्च मदालस्यसमन्वितः ॥

जीवशुक्रबु(धश्चन्द्राः ? धाश्चन्द्रः) लग्नराशिसमन्विताः ।
लग्नात् केन्द्रगताश्चैव राजलक्षणसंयुतः ॥

लग्ने राहुसमायुक्ते मन्दभौमनिरीक्षिते ।
लग्नांशे मन्दसौम्ये च जातस्स यमलो भवेत् ॥

End:

रन्ध्रेशे पापसंयुक्ते रन्ध्रे पापसमन्विते ।
शुभदृष्टिविहीने च बालारिष्टं विनिर्दिशेत् ॥

व्ययस्थानगते केतौ गुरुणापि निरीक्षिते ।
व्ययलाभाधिपौ लग्ने बहुद्रव्यार्जको भवेत् ॥

लग्नाधिपोऽतिबलवानशुभैरदृष्टः
केन्द्रस्थितः शुभखगैरवलोक्यमानः ।
मृत्युं विहाय विदधाति सुदीर्घमायुः
साधुर्गुणैर्बहुभिरूर्जितया च लक्ष्म्या ॥

इति व्ययभावः समाप्तः ।

Colophon :

इति जातकालङ्कारः समाप्तः ।

Author :

Remarks—The work is different from the Jātakalaṅkāra of Sūryadevayajvā, a commentary on the Jātakakarmapaddhati of Śrīpati.

---

## ॥ सन्तानदीपिका ॥

No. 682 C. SANTĀNADĪPIKĀ.

C. O. L. No. 2520 C.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—10. 5 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—125. Incomplete.

Owner—Same as No. 682 A.

Subject etc.—Same as No. 968, DCSMMPL.

Remarks—The leaves are much damaged. The Ms. consists of 81 verses only. The work is printed in Bombay.

---

## ॥ ज्ञानप्रदीपिका ॥

## No. 682 D. JÑĀNAPRADĪPIKĀ.

C. O. L. No. 2520 D.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—26. 4—5 lines per page and 32 letters per line. Script — Grantha. No. of Granthas — 225. Complete.

Owner—Same as No. 682 A.

Subject—Reading of a person's past, present and future.

Beginning:

श्रीमद्गङ्गाधरसुतं चन्द्रलेखावतंसितम् ।
सिद्धिदं सर्वविद्यानां वन्दे दन्तावलाननम् ॥

ज्ञानप्रदीपिका नाम शास्त्रं लोकोपकारकम् ।
प्रश्नादर्शं प्रवक्ष्यामि पूर्वशास्त्रानुसारतः ॥

भूतं भव्यं वर्तमानं शुभाशुभनिरीक्षणम् ।
पञ्चप्रकारमात्रेण चक्रुः केन्द्रबलाबलम् ॥

क्षेत्रं दृष्टिं नरं नारीं युग्मवंशं च वर्णकम् ।
मृगादिनररूपाणि किरणान्त्योजनानि च (?)॥

आयू रसायनाद्यन्तं परीक्ष्य कथयेद्विदुः ।
चरस्थिरोभयान् राशीन् तत्प्रवेशस्थलानि च ॥

End:

एतेषु फणियुक्तेषु बुधश्चोरभयंकरम् ।
मरणश्चैव दैवज्ञो नसन्देहो वदेत्सुधीः ॥

निधनानि धनस्थाने पापैरशुभमादिशेत् ।
एषु स्थानेषु तत्रेष्टशुभाश्चेत् सुशुभं वदेत् ॥

तन्वादिभावाः पापैस्तु युक्ता दृष्टा विनश्यति ।
शुभैर्दृष्टे युता वापि तत्तद्भावाभिभाषणम् ॥

इति उदयकाण्डः ।

Colophon :

इति ज्ञानप्रदीपिका समाप्ता ।

Author :

Remarks—The work is also known as Praśnādarśa.

## ॥ कालप्रकाशिका ॥

## No. 682 E. KĀLAPRAKĀŚIKĀ.

C. O. L. No. 2520 E.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—13. 4 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—105.

Owner—Same as No. 682 A.

Subject—Prescription of auspicious time for the performance of each religious function.

Beginning :

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संगच्छेदार्तवे स्त्रियम् ॥

आ स्नानदिवसाद्वाग् दोषं वक्ष्यामि सङ्गमे ।
प्रथमेऽहन्यनुप्राप्ते निषेकं यः करिष्यति ॥

शीघ्रं स मृत्युमाप्नोति द्वितीये स्त्री मरिष्यति ।
तृतीये हि निषिक्तस्य गर्भस्य मरणं भवेत् ॥

चतुर्थे जायते पुत्रो अल्पायुर्धनजीवितः ।
विद्याहीनः स्थानशून्यः दुःखी चाचारवर्जितः ॥

End :

कामस्थौ शशिशुक्रौ चेत् तस्या वृद्धो भवेत् पतिः ।
बाल्ये वैधव्यमाप्नोति पापास्सप्तगता यदि ॥

नक्रकुम्भालिमेषेषु लग्ने चन्द्रेण संयुते ।
शुक्रे वा संयुते पापभूमिर्मात्रा सहासती ॥

रन्ध्रस्थाने स्थिते क्रूरे जाता वैधव्यमाप्नुयात् ।
अष्टमस्थानगे क्रूरे कुडुम्बस्थे शुभे गृहे ॥

या नारी जायते सा तु भर्तुः पूर्वं मरिष्यति ।
वृषकुम्भालिसिंहेषु चन्द्रे त्वल्पसुता भवेत् ॥

बुधक्षेत्रे तु विद्वान् स्याद् गुरुक्षेत्रे गुणान्वितः ।
रविक्षेत्रे त्वातिमृदुस्तस्मिन्नर्के त्यजेत् पतिः ॥

Colophon :

इति कालप्रकाशिकायां पञ्चमोऽध्यायः ।

हरिः ॐ

Author :

Remarks—The Fol. after the close of the work contains the following topics on *Putraśānti*:

सुतस्थाने दिनेशे तु रात्रौ जातस्तु चेद् यदि ।
सर्पदोषनिवृत्त्यर्थं द्वन्द्वसर्पान्तरे शिवम् ॥

सुतस्थाने स्थिते चन्द्रे रात्रौ चेदेकवक्त्रकम् ।
शिवालये प्रतिष्ठाप्य देवीप्रीतिं च कारयेत् ॥

सुतस्थाने कुजे संस्थे कालीमर्दनशीर्षकम् ।
शिवालये प्रतिष्ठाप्य स्कन्दप्रीतिं ध्रुवं शिशुम् ॥

सुतस्थाने स्थिते सौम्ये दिवा चेदनन्तकृष्णकम् ।
विष्ण्वालये प्रतिष्ठाप्य विष्णुप्रीतिं ध्रुवं सुतम् ॥

सुतस्थाने स्थिते जीवे रात्रौ यदि च शेपकम् ।
रात्रौ जातस्य शुक्रे स्यान्नवनीताख्यकृष्णकम् ॥

एकशीर्षं च सर्पश्च विष्णुक्षेत्रे प्रतिष्ठितम् ।
सुतस्थाने स्थिते राहौ दिवा चेत् पञ्चवक्त्रकम् ॥

कृष्णश्च नवनीताख्यं विष्णुक्षेत्रे प्रतिष्ठितम् ।
केतुश्चेच्छेषरूपेण त्रिशीर्षेण युतं हयम् ॥

हरिः । ॐ ।

---

## ॥ रोगशान्त्यादि ॥

No. 682 F. ROGAŚĀNTYĀDI.

C. O. L. No. 2520 F.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—9.

4 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—75.

Owner—Same as No. 682 A.

Subject—Methods of curing certain fell diseases.

Beginning:

लग्नस्थे पापयुक्ते सति खलु विहगे बिम्बतो(?) तत्र वाच्यं
बिम्बं भिन्नं हि तस्मिन् धरणितनुभवाशुद्धिरेवाद्य पापैः ।
बिम्बं तत्र प्रदेयं भवति खलु मुदे मेचरेऽथालयस्थे
जीर्णं वेश्मालयं तं नवमथ कुरुतां दीयतां वान्यवेश्म ॥

नृत्तद्यूतगते कुजार्कगृहगे खेटेऽत्र दीपः स्मृतः
शुक्रे वालयगे तु पायसमपि क्षीरं घृतं वा पुनः ।
बोधे चन्दनमार्यमन्दिरगते मालाः प्रसूनानि वा
मन्दर्क्षे खलु भूषणानि कृसरं तत्तन्मुदे दीयताम् ॥

अर्के वार्कगृहस्थे वा विहगेऽनिष्टमांस्थिते ।
देवाराधानमादेयं पृच्छतां रोगशान्तये ॥

End:

योनौ पुत्रवती स्यातां राशौ स्वाम्यनुकूलकम् ।
आधिपत्यं स्नेहयुक्तं वश्यं वश्यकरं भवेत् ॥

रज्जुभङ्गमवाप्नोति वेधं सर्वं प्रतिष्ठितम् ।
सुतभे लग्नसंस्थैश्च शुक्रेणापि युतेऽथवा ॥

पापैश्च यदि युक्तेऽपि पुत्रलाभं विनिर्दिशेत् ।
अमरेड्ये लग्नगते असुरेड्ययुतेऽथवा ॥

पापद्वये चोभयत्र न पापफलमाप्नुयात् ।
गुलिकभवननाथे केन्द्र (के?गे) वा त्रिकोणे
विपुलसुगुणकीर्तिः प्राप्तपुत्रो जितारिः ।

Colophon :

Author :

Remarks—This is a portion detached from another codex. All details regarding the curing of diseases, obsessions of evil spirits etc. form its subject-matter.

---

## ॥ कालविधानपद्धतिः ॥

No. 682 G. KĀLAVIDHĀNAPADDHATI.

C. O. L. No. 2520 G.

Substance—Palm leaf. Size—15″ 1½″. Leaves—31. 5 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—300.

Owner—Same as No. 682 A.

Subject—Same as No. 682 E.

Beginning :

श्रियः करारोपितरत्नमुद्रिका-
मरीचिबालातपलोहिनीकृतम् ।
सतामुपास्यं सुरशेखरीकृतं
करोतु शं वो हरिपादपङ्कजम् ॥

प्रणम्य कालात्मकमेकमक्षयं
भवं भवानीसुखमिन्दुभूषणम् ।
विदग्धमौहूर्तिककीर्तिवृद्धये
करोम्यहं कालविधानपद्धतिम् ॥

वेदागमोक्तसमये रुचिरे प्रदेशे
वाजीकृतेन जितरोषभयेन पुंसा ।
मन्त्रौषधप्रवरतीर्थजलोज्ज्वलेषु
कान्ताजनेष्वथ निषेकविधिर्विधेयः ॥

End :

अश्वी मृगशिरश्चैव पुनर्वस्वद्वयस्तथा ।
अहिर्बुध्न्यद्वयश्चैव दशपञ्च जलर्क्षकम् ॥
ജലരാശി.

वृषकर्किंतुलाली च मृगकुम्भझषाः स्मृताः ।
शशिशुक्रफणिश्चैव जलराशिग्रहाः स्मृताः ॥

मत्स्ये कुलीरे मकरे बहुत्वं
वृषञ्च कुम्भं च तदर्धमाहुः ।
अलिश्च तौली जलपादमाहुः
शेषास्तु राशौ जलमप्रशस्तम् ॥

Colophon :

इति कालविधानपद्धतिस्समाप्ता

Author :

Remarks—The work is available in print.

## ॥ जातकभावफलम् ॥

### No. 683 A. JĀTAKABHĀVAPHALAM.

C. O. L. No. 267 A.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages—171. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Owner—C. O.

Subject—Same as No. 682 B.

Beginning :

अस्तु त्रैलोक्यदीपाय भक्ताभिमतदायिने ।
समस्तविद्यानिर्माणकवये रवये नमः ॥

वृत्ताक्षो जनवल्लभोऽतिचपलो गोमान् व्ययार्तोऽटनो
वाचालो लघुभोजनः कुटिलगो ज्ञानी सभापूजितः ।
वित्तात्मा वनितादृतोऽल्पतनयः क्रोधी स्वशौर्यान्वितो
मेषोत्थः सहजाग्रजोऽतिकृपणः क्लेशान्वितो बन्धुभिः ॥

उद्वृत्तो बलवान् पृथूरुवदनो भोगी सुखी ज्ञानवान्
आसीनो गिरिकन्दरेषु निपुणो ज्ञानार्थवागीश्वरः ।
पूर्वोक्तैः सुतबन्धुभिर्विरहितः कन्याप्रजावान् क्षमी
मध्यान्त्ये सुखवान् वृषोत्थमनुजो दारप्रियो दीप्तिमान् ॥

कन्दर्पप्रतिमो विशालवदनो विस्पष्टवागस्थिरो
वैक्लब्ये मदनातुरोऽल्पतनयः सद्यूतगानप्रियः ।
बन्धुद्विट् कफमारुतार्तहृदयो दारप्रियो दानवान्
हास्यज्ञो मिथुने नवाङ्गनिरतो जातः प्रवासी पटुः ॥

End :

पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवं स्थितानामिदमायुरत्र
वृद्धिं समाप्नोति मुनिप्रवादः ॥

विप्रा नार्यश्च विप्राश्च विष्णुः सर्वैश्च सेव्यताम् ।
सर्वापदां निवृत्त्यर्थं सम्पदां च समृद्धये ॥
अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥

Colophon :

Author :

Remarks—This work facilitates the prognostication of results depending upon the day, Pakṣa or Rāśi relating to one's birth. The title is based on the subject-matter.

---

॥ जातकफलम् ॥

No. 683 B. JĀTAKAPHALAM.

C. O. L. No. 267 B.

Substance—Paper. Size—11½″ × 9″. Pages — 51. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—500.

Owner—C. O.

Subject—The effects predicated by horoscopes.

Beginning :

ഗുരുക്കന്മാരെ വന്ദിച്ചിട്ടുവരാലുക്രമായതിൽ
ചുരുക്കീ ജാതകഫലം കുറഞ്ഞൊന്നിഹ ലിഖ്യതേ
മൂർത്തിയും കീർത്തിയും സ്ഥാനം ത്രീണി ലഗ്നേന ചിന്തയേത്
അർത്ഥവും നേത്രവും വാക്കും ദ്വിതീയേന കുടുംബവും
വീര്യവും വിക്രമം ധൈര്യം സോദരം ച തൃതീയതഃ
ചതുർത്ഥേന സുഖം ബന്ധും ഗൃഹാൻ മരുമകൻ തഥാ
വിദ്യയും ക്ഷേത്രമമ്മാവൻ പശുക്കളിവ ചിന്തയേൽ
പഞ്ചമാൽ ബുദ്ധിപുത്രം ച പൂർവ്വപുണ്യമമാത്യരും
വ്രണവും വ്യാധിയും ശത്രുക്കളിവ ഷഷ്ഠേന ചിന്തയേൽ
കാമവും ഭാര്യയും നോക്കും സപ്തമേന നടക്കയും
പിടിച്ചുപരിദാസന്മാർ മരണക്ലേശമഷ്ടമാൽ
നവമാൽ ഗുരുഭൃതന്മാർ പുണ്യവും ഭാഗ്യമൌഷധം
അഭിമാനകർമ്മണി ദശമാദാസ്പദാദിയും
ഏകാദശേന വിത്തസ്യ ലാഭവും ദുഃഖനാശവും
അപൂർവാവവും(?) ഭ്രംശം ദ്വാദശേന വിചിന്തയേൽ

End :

आषाढसितपञ्चम्यां भानुवारे महद्भयम् ।
सोमवारे सुवृष्टिः स्याद् गुरुवारे महद्भयम् ॥

भौमे युद्धानि दुर्भिक्षं बुधवारे सुभिक्षकम् ।
शुक्रवारे सुवृष्टिः स्यान्मन्दवारे महद्भयम् ॥

जातः श्रीनाथयोगे सकलनृपवरैरर्चितः पादपीठे
द्व्यष्टाब्दात् परमायुरन्तमवधि श्रीविष्णुभक्तः सुखी ।
कन्दर्पप्रतिमो विशालवदनः कान्ताजनैः काङ्क्षितः
श्रीमान् षोडशदानकृत् करतलैर्मृष्टान्नदाता भवेत् ॥

Author :

Remarks—The work begins with the methods of preparing a horoscope and proceeds to indicate the auspicious days in an year. It is composed in Maṇipravāḷa style.

## ॥ जातकलेखनक्रमः ॥

## No. 684. JĀTAKALEKHANAKRAMA.

C. O. L. No. 147.

Substance — Paper. Size—11″ · 9″. Pages — 39. 20 lines per page and 19 letters per line. Script—Malayāḷam. No. of Granthas — 400. Complete.

Owner—C. O.

Subject—The principles to be observed in the composition of horoscopes.

Beginning :

ശ്ലോകം മുൻതൊട്ടനാൾ പിന്നെ രാശിയും നാമധേയവും
ആദിത്യാദിസ്ഫുടം സർവ്വം ഭാഷയിൽ കലിനാൾ പുനഃ
ശനിയും വ്യാഴവും കൊല്ലം മാസത്തിൽ ചെന്ന തീയതിയും
ആഴ്ച നാൾ പക്കവും പിന്നെ ദിവാരാത്രിവിഭാഗവും
കൂറും തദംശകം രാശി രാശിയിൽ ചെന്ന നാഴിക
ഷഡ്വർഗ്ഗം നാളിലെ നാഡീചന്ദ്രവേല പുനഃ ക്രിയാഃ
അവസ്ഥാപക്ഷം കരണം യോനിഭേദം ഗണം തഥാ
മൃഗം വൃക്ഷം പക്ഷിഭൂതം ദേവതാ രവിനിന്നുടം
തൽഫലം ദിവസം നിത്യയോഗോ വൈനാശകാംശകം

ഭാവസ്ഥിതിഗ്രഹശ്ചാപി യോഗം ചാപി ദശാഫലം
നക്ഷത്രദശയും പിന്നെ അപഹാരഫലങ്ങളും
എഴ്ത്തു സൂക്ഷ്മമായിട്ട നിര്യ്യാണദശയും പുനഃ

End :

शौक्र्यां गीतरतिप्रमोदसुरभिद्रव्यान्नपानाम्बर-
स्त्रीरत्नद्युतिमन्मथोपकरणज्ञानेष्टमित्रागमाः ।
कौशल्यं क्रयविक्रये कृषिनिधिप्राप्तिर्धनस्यागमो
वन्यव्याधनिषादधर्मरहितैर्वैरं शुचिस्नेहतः ॥

सौरीं प्राप्य खरोष्ट्रपक्षिमहिषीवृद्धाङ्गनावाप्तयः
श्रेणीग्रामपुराधिकारजनिता पूजा कुधान्यागमः ।
श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्तितन्द्राश्रमा
भृत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यङ्गताम् ॥

Colophon :

जातकलेखनक्रमः समाप्तः ।
शुभं भूयात् ।

Author :

Remarks—The principles of composing horoscopes are elucidated here in Malayāḷam.

---

## ॥ जातकसर्वस्वसंग्रहः (सव्याख्यः) ॥

### No. 685 A. JĀTAKASARVASVASAṄGRAHA with commentary.

C. O. L. No. 1908 A.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—

23. 6 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—400.

Owner—Vaṭṭappaḷḷi Maṭham, Śucīndram.

Subject—Same as No. 673.

Beginning:

.... .... ....नाथेन धीमता ।
होराशास्त्रे.... मर्वस्वं मया मङ्गृह्यते स्फुटम् ॥

धूमोऽर्को विश्वभ.... .... भवनयुतो मण्डलाच्छोधितोऽसौ
.... .... ....भसंशोधितश्च ।

शैलेशाभागयुक्त.... ....रथ च शिखी पञ्च तेऽप्यप्रकाशाः
प्रादुर्भावे च तेषां.... .... ....कथितं जा.... .... ॥

End:

त्रिषष्ठलाभेषु गतैः समस्तैः
सौम्यैः सुखार्थां(र्थाश्च) भवन्ति बाल्ये ।
तत्रैव पापैर्वयसोऽन्त्यकाले
जयार्थपुत्राश्च भवन्ति सम्यक् ॥

भ्रष्टस्य तुङ्गादवरोहिसंज्ञेत्यादि च । एकं द्वे नवविंशतिरित्यादि ।
लग्ने केन्द्रे वा स्वोच्चा...दिषु स्थितस्य गुरोर्दशा पुष्टफला ।

Colophon:

इति जातकसर्वस्वसंग्रहे जम्बूनाथविरचिते सटीके चतुर्थोऽध्यायः ।

Author—Jambūnātha.

Remarks—No order has been maintained in the arrangement of leaves.

---

## ॥ प्रश्नामृतम् ॥

No. 685 B. PRAŚNĀMṚTAM.

C. O. L. No. 1908 B.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—29. 6 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—522.

Owner –Same as No. 685 A.

Subject—Prognostication of logevity etc. by means of ***Praśna***.

Beginning :

अस्तोक.... ....विन्यस्तनिस्तुलस्तुत्यगोस्तनम् ।
हस्तन्यस्तशुकं वस्तु ध्वस्तांहस्तोममस्तु नः ॥
कृष्णीय.... .... .... .... ....करावली (?)
प्रश्नाब्धीन् स्वधिया विमृश्य बहुशस्तेभ्यः किमप्युद्धृतम् ।
जम्बूनाथममाह्वयेन विदुषा श्री.... .... ....
.... .... मल्पशब्दमधुरं प्रश्नामृतं तायते ॥
अधीत्य किञ्चनाप्यतो न कञ्चनाप्यकिञ्चनः
विपश्चितामप.... .... .... .... ।

End :

अजवृषधनुषां नवतिः शतानि झषमकरकुम्भराशीनाम् ।
तौलेः सप्तदशाधिकमन्येषु शतं दशाद्यधिकम् ॥

चन्द्रे नवकृतिरुक्ता षष्टिर्जीवे... ....ले तु पञ्चकृतिः ।
सप्ततिरधिका षड्भिः शुक्रे सौम्ये चतुर्भिः स्यात् ॥
अनेन रश्मिविधिना यु....व्यसंख्यादि विचार्यमिति ।

Colophon :

इति जम्बूनाथविरचिते प्रश्नामृते त्रयोदशो रसः ।

Author—Jambūnātha.

Remarks—This work facilitates the reading of the planetary influences from the positions of the heavenly bodies at the time of the *praśna.* Each chapter is entitled "Rasa" here and hence the title. The leaves are much damaged. The subject-matter is compressed in 13 Rasas.

---

## ॥ ज्ञानदीपादिसंक्षेपः ॥

### No. 685 C. JÑĀNADĪPĀDISAMKṢEPA.

C. O. L. No. 1908 C.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 7 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—210.

Owner—Same as No. 685 A.

Subject—Astrological inquiries,

Beginning :

.... .... ....विहायानुचितानपि ।
ज्ञानदीपादिशास्त्रेभ्योऽपूर्वं संक्षिप्य कथ्यते ॥
जीवो बुधेज्यौ शुक्र.... .... .... .... ।
.... .... ....राश्च वीन्दिना: ॥
वीन्द्वर्कभौमाः सुहृदो रव्यादीनां परेऽरयः ।
मित्रक्षेत्राणि मित्राणि शत्रुक्षेत्राणि शत्रवः ॥
नीचभं शत्रुवद् ज्ञेयमुच्चभं त्वतिशोभनम् ।

End :

त्रपुसीसलोहकाळाकरभोष्ट्रमहिषकृष्णधान्यानाम् ।
मृतसूतक....पा....क....जरतिदीक्ष....प्रभुः मौरः ॥

Colophon :

इत्युदयकाण्डः ।

Author :

Remarks—The Ms. furnishes the auspicious time, for sinking wells, tanks etc. Certain uncommon Tamil words occur in the course of the work. Its title may be deduced from the introductory verse.

---

## ॥ होराशास्त्रम् ॥

## No. 685 D. HORĀŚĀSTRAM.

C. O. L. No. 1908 D.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves--

34. 7 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—644. Incomplete.

Owner—Same as No. 685 A.

Subject—Astrological science.

Author—Varāha Mihira.

Remarks—This work is printed with commentary as No. 91 in TSS.

## ॥ होरासारः ॥

## No. 685 E. HORĀSĀRA.

C. O. L. No. 1908 E.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 6 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—200.

Subject—A compendium of the Horaśāstra.

Beginning :

ग्रस्ते चन्द्रे...पापयुते रिःफरन्ध्रनवमे वा ।
जातो....षा कलहप्रियोऽतिरो....वा ॥

जन्मपतिर्विकलाङ्गो (?) पश्यति सौरिं चतुष्टये यस्य ।
स... ..विहीनः प्रव्रज्यां प्राप्नुयात्पुरुषः ॥

.... .... .... .... .... ....शी लग्ने ।

End :

....आयुःप्रमाणमस्मिन् गदितं समानं वा ।
एतत्सर्वं श्रोतुं भवत्प्रसादात्प्रयोगमिच्छामि ॥
प्रारभ्य सुमुहूर्ते प्र....कर्ता....कुलनक्षत्रे ।
कर्ता समीपसंस्थो नान्यो....मिसु....भवति ॥
फलतां ज्योतिश्च....क्षाणतारकावरदाश्च दैवज्ञ (?) ।
काले पुरुषोऽप्येवं....सम्भावयेन्नरं तेषु ।

Colophon :

इति होरासारे जातकनिरूपणं नाम त्रिंशोऽध्यायः । होराशास्त्रं समाप्तम् ।

Author :

Remarks—The Ms. is old and much injured.

## ॥ सर्वार्थचिन्तामणिः ॥

No. 685 F. SARVĀRTHACINTĀMAṆI.

C. O. L. No. 1908 F.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—29. 7 lines per page and 41 letters per line. Script—Grantha. No. of Granthas—600. Incomplete.

Owner—Same as No. 685 A.

Subject—Same as No. 670 A.

Beginning :

श्रीमच्छेषगिरेस्तटाधिनिलयं श्रीवेङ्कटेशं गुरुं
नत्वा वेङ्कटनाथकस्त्वनुदिनं जातोऽल्पयाऽर्यात्सुधीः ।
ज्योतिश्शास्त्रमहाब्धिपारगमने वक्ष्यामि पोतात्मकं
ज्योतिश्शास्त्रमिदं विपाकविदुषां सर्वार्थचिन्तामणिम् ॥

नीलाम्बररुचिं देवं सक्रुध्यान्ति मनोरथम् ।
देवाः प्रणम्य यं सर्वे तं नमामि गजाननम् ॥

वाग्विभूतिप्रदा देवी या श्वेताम्बुरुहस्थिता ।
कर्पूरधवळाकारा स्वयं नृत्यतु वाचि मे ॥

मेषादिराशयः सर्वे दिनेशप्रमुखा ग्रहाः ।
ये च लोकोपकर्तारः पान्तु मामिह तेजसा ॥

End :

पापान्विते पापनिरीक्षिते वा
पापान्तरे वा सुखपे तदीशे ।
क्रूरादिषष्ट्यंशसमन्विते वा
पापी नरः स्याच्छुभदृष्टि(युङ्मु)क्ते ॥

पापे ब....सुखराशियुक्ते
तदीश्वरे वारिविमूढयाते ।
पापान्विते वा यमसूनुयुक्ते
जातो बहुत्वं समुपेति पापम् ॥

शुक्रेन्दुवद्देवसु.... .... ....

Colophon :

संज्ञाध्यायो वर्णितस्सर्वशास्त्रात्
सारान् बुद्ध्वा.... .... .... ।

यद्यत्सर्वं वेङ्कट.... .... ....
तत्तत्पाके योजयेत् तत्फलानि ॥

इति सर्वार्थचिन्तामणौ चतुर्थोऽध्यायः ।

Author—Veṅkaṭanāyaka.

Remarks—The Ms. contains the first four chapters and a portion of the fifth. The work is printed at Bombay.

---

## ॥ मुहूर्तपदवी (सव्याख्या) ॥

### No. 685 G. MUHŪRTAPADAVĪ
with commentary.

C. O. L. No. 1908 G.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—28. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas — 350.

Owner—Same as No. 685 A.

Subject—An account of the purificatory rites.

Beginning:

हरिः । ओम् ।

उल्कोर्वीचलनोपरागगुळिकाष्षष्ठाष्टमान्त्येन्दुसद्-
द्रष्ट्रारूढविमुक्तसाशिसितदक्सायाह्नसन्ध्यादयः ।
गण्डान्तोष्णविषं स्थिरं च करणं रिक्ताष्टमीविष्टयो
लाटैकार्गळवैधृताहिशिरसः सर्वत्र वर्ज्या (ष्टिअ)मी ॥

उल्का अलातपतनम्। उर्वीचलनं भूकम्पः। एतयोरेको वा यस्मिन् दिने दृश्यते तद्दिनमारभ्य दिनत्रयं वर्ज्यं सर्वमुहूर्तेषु ।

"उल्कापाते च भूकम्पे वर्जयेद्दिवसत्रयम्"

इति वचनात् । उपरागश्चन्द्रसूर्ययोर्ग्रहणं, तस्मिन्नपि तथा—

End :

अयुक्तान्याह—

कृत्तिका ज्येष्ठा.... .... ....त्रयोदशी श्रेष्ठा ।

गुळिकोदयमपि यु.... (वि)चार्य धान्यसंग्रहः कार्यः ॥

विघ्नराजस्य कृप.... .... ....

Colophon :

.... मुहूर्तपदवीव्याख्यां कृतवान् वत्सगोत्रजः ।

Author :

Remarks—Almanacs are generally prepared in accordance with the principles enunciated in this work. The leaves are much damaged.

---

## ॥ जातकसारसंग्रहः (उपदेशसूत्रव्याख्या) ॥

No. 686 A. JĀTAKASĀRASAṄGRAHA.

C. O. L. No. 2131 A.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—99. 9—12 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Puruṣottaman Śaṅkaran Nambūrippāḍ, Kunnattunāḍu.

Subject—The principles in regard to the composition of horoscopes.

Beginning :

हरिः । श्रीगणपतये नमः ।

उपदेशं व्याख्यास्यामः । अभिपश्यन्ति ऋक्षाणि । पार्श्वभे च । ऋक्षाणि अभिमुखं पश्यन्ति । मेषो वृश्चिकं वृषस्तुलां मिथुनः कन्यां कर्कटकः कुम्भं सिंहो मकरं धनुर्मीनं च पश्यति । एवं मेषः सिंहं कुम्भं च वृषभः कर्कटकं मकरं च मिथुनः धनुर्मीनं च पश्यति । तन्निष्ठाश्च तद्वत् । दारभाग्यशूलस्था अर्गला निध्यातुः । उक्तप्रकारेण दृष्टियुक्तानां ग्रहाणां चतुर्थद्वितीयैकादशस्थानस्था ग्रहा अर्गलाः शुभार्गलाः । उक्तशुभार्गलफलप्रदानसाधका इति यावत् ।

End :

अतस्तत्तज्जातकानुसारेण मारकनिर्णयं कृत्वा तत्तदायुषां योग्यराशौ मरणं वक्तव्यम् । इति होरादशा ।

जन्मत्रयेऽपि निष्पापो वेत्ति नान्यो महेश्वरि ।
इदं यो वेत्ति मां वेत्ति यो न वेत्ति स मामपि ॥

Colophon :

इति श्रीगोष्ठमुक्कुलरामचन्द्रदीक्षितस्य पुत्रेण राघवभट्टेन कृते जातकसारसंग्रहे आयुर्दायपरिच्छेदः प्रथमः ।

Author—Rāghavabhaṭṭa.

Remarks—At the end of the third *pariccheda* (Fol. 51) the author's name is given as Rāmabhaṭṭa. The Ms. extends up to the end of the portion dealing with Horādaśā.

---

## ॥ उपदेशसूत्रम् ॥

## No. 686 B. UPADEŚASŪTRAM.

C. O. L. No. 2131 B.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—16. 9—12 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner : Subject—Same as No. 686 A.

Beginning :

हरिः । श्रीगणपतये नमः ।

अभिपश्यन्ति ऋक्षाणि । पार्श्वभे च तन्निष्ठाश्च तद्वत् । दारभाग्यशूलस्थम् अर्गलं निध्यातुः । कामस्थास्तु भूयसा पापानां रिःफनीचकामस्थविरोधिनः न्यूनविबलाश्च । पार्श्वात्रिकोणे एवम् । विपरीतं तमःकेत्वोः ।

End :

अमात्यानुचराद्देवताभक्तिः । स्वांशे केवलपापसंबन्धे परजातः शनिराहुभ्यां परभूतस्य प्रसिद्धिः । गोपनमन्ये भाः । शुभवर्गे एव पादमात्रं द्विग्रहे कुलमुख्यः ।

Colophon :

इत्युपदेशसूत्रे प्रथमाध्यायः ।

Author—Jaimini.

Remarks—This Ms. contains only one chapter.

## ॥ जातकादेशव्याख्यानम् ॥

## No. 687. JĀTAKĀDEŚAVYĀKHYĀNAM.

C. O. L. No. 145.

Substance—Paper. Size—11″ × 8½″. Pages—136. 19 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Owner—C. O.

Subject—Characteristics of horoscopes.

Beginning :

അഞ്ചിൽ ചന്ദ്രന്നു ക്രൂരനാകയും ശത്രുവർദ്ധനവും ഉഷ്ണം കുറകയും കാമാദികളിൽ ശ്രദ്ധ കുറകയും അലസനാകയും ഫലം. ആറിൽ ചന്ദ്രന്നു അന്തർവ്വ്യാധിയാലും ഉദരരോഗത്താലും ഉപദ്രവവും ഫലം. ഏഴിൽ ചന്ദ്രന്നു അട്ടപ്പാൻ വശമല്ലായ്കയും സുഖിയാകയും, ശരീരകാന്തിയും കാമിയാകയും ഫലം. എട്ടിൽ ചന്ദ്രന്നു ബുദ്ധിമാനാകയും തേജസ്വിയാകയും വ്യാധിപീഡയും ദേഹത്തിങ്കൽ മ...വുണ്ടാകയും ഫലം.

End :

सत्संश्रितोऽतिचपलो नातिसुतो निष्ठुरोऽतिरोषश्च ।
सर्वे पञ्चमसंस्थे स्वधर्मनिरतश्च बुद्धिभिर्युक्तः ॥

उदारशीलस्सत्कर्मा विद्वान् बन्धुजनप्रियः ।
महात्मा सुप्रसिद्धश्च सर्पे रिपुगते फलम् ॥

बहुदारोदारमतिर्महोदये दीक्षितः स्वतन्त्रश्च ।
पादाक्षिदन्तरोगी कामे राहौ विनष्टमतिः ॥

ज्ञानी विनोदशीलो विकलाङ्गो नातिपुत्रवानशुचिः ।
पामादिपीडिताङ्गो निधने राहौ न दीर्घायुः ॥

Colophon :

Author :

Remarks—Same as No. 607 A.

## ॥ जातकानीतिमार्गः ॥

No. 688 A. JĀTAKĀNĪTIMĀRGA.

C. O. L. No. 2431 A.

Substance—Palm leaf. Size—9″ × 1¾″. Leaves—21. 6—7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 150. Complete.

Owner—Maheśvaradattan Nambūri.

Subject—Principles in regard to the composition of horoscopes.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

ज्ञाताश्छायाम्बुयन्त्राद्यैर्जन्मकाले विपश्चिता ।
नेया दृक्तुल्यतन्त्रेण ग्रहाः सूर्यादयोऽसकृत् ॥

तिथिचन्द्रार्कयोगौ चाप्यानीयाथ लिखेत् क्रमात् ।
द्युगणांश्च ग्रहांश्चैव तिथिं योगं च लग्नभम् ॥

चन्द्रो रुद्रोदयो विद्या नयः स्तनः खनी रवेः ।
नागः खनी खरो रत्नं स्तेनो विद्या तनुस्तथा ॥

जया विद्या नयः स्तेनः खनी चन्द्रः खरः क्रमात् ।
विद्या चन्द्रस्तनुर्जाया नागो नाकः खरस्तथा ॥

विंशन्नाड्योऽह्निगुलिकः कालश्च यमकण्टकः ।
क्रमादर्धप्रहारश्च दिनपञ्चमवान्निशि ।
दिनरात्रिप्रमाणघ्नास्तत्तन्मान्द्यादिनाडिकाः ॥

End:

लग्नाधिपकारकयोर्लग्नाधिपभावनाथयोरथवा ।
तारकदिनकरयोर्वा स्फुटयोगे भावजन्म वक्तव्यम् ॥

लग्नेशभावाधिपती पृथक्स्थौ
राशिग्रहोक्तैर्गुणकैर्यथोक्तम् ।
हत्वा तदैक्यं गुणपिण्डमाहुः
सदृक्षमिष्टं यदि भावलाभः ॥

स्वस्फुटादेव सर्वेषां भानं त्यक्त्वा तिथिं विदुः ।
एवं तु जातकानीतिर्दिङ्मात्रमिह दर्शिता ॥

Colophon :

इति जातकानीतिमार्गे चतुर्दशः खण्डः समाप्तः ।

१६६.

Author :

Remarks—Same as No. 607 A.

---

## ॥ जातकानीतिमार्गभाषाव्याख्या ॥

## No. 688 B. JĀTAKANĪTIMĀRGABHĀṢĀ-VYĀKHYĀ.

C. O. L. No. 2431 B.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—87. 7—9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1300. Complete.

Owner : Subject—Same as No. 678 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

അനന്തരം ജാതകം വരുത്തും പ്രകാരത്തെച്ചൊല്ലുന്നു. പന്ത്രണ്ടുവയസ്സുകഴിഞ്ഞേ ജാതകം വരുത്താവൂ എന്ന സമ്പ്രദായമുണ്ടു്. കാലത്തുങ്കലെക്ക സൂര്യാദിനവഗ്രഹങ്ങളുടെ സ്ഫുടങ്ങളെ സൂക്ഷ്മമായി ഉണ്ടാക്ക ഗണിതത്തുങ്കൽ എല്ലാമവും മൂന്നു വട്ടം ഒരുപോലെ വരുവോളം ക്രിയ ചെയ്യണം.

End :

എന്നിട്ട അവററെ വരുത്തുവാൻ സാധനക്രിയ എന്ന ഒരു ഗ്രന്ഥമുണ്ടായി. പിന്നെ ആയുർദായാദികൾ ഗണിക്കണമെന്ന ആഗ്രഹമുണ്ടായി എങ്കിൽ അവയ്ക്കായിക്കൊണ്ടു ജാതകാനീതിമാർഗ്ഗമുണ്ടാക്കി. പിന്നെ സംഗ്രഹത്തിന്നു സംസ്കൃതവ്യാഖ്യാനവും ഭാഷയും ഉണ്ടാക്കി ജാതകസാരസംഗ്രഹത്തിനും സാധനക്രിയയ്ക്കും ജാതകാനീതിമാർഗത്തിനും ഭാഷയുണ്ടാക്കി. പിന്നെ ഇവിടെ വരുത്തുവാൻ പറഞ്ഞിവയുടെ ഫലങ്ങളെ ഫലസാരസമുച്ചയത്തിൽ ചൊല്ലുമെന്നറിക.

Colophon :

इति केरलीयायां जातकानीतिभाषायां चतुर्दशः खण्डः ।
जातकानीतिमार्गभाषा समाप्ता ।

Author :

Remarks—Same as No. 607 A.

---

## ॥ संग्रहसाधनक्रिया ॥

No. 688 C. SAṄGRAHASĀDHANAKRIYĀ.

C. O. L. No. 2431 C.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—17. 6 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—150. Complete.

Owner—Same as No. 688 A.

Subject—The principles in regard to astrological computation.

Beginning:

हरिः ।

संग्रहे पठ्यमानानां साधनानां क्रियोच्यते ।
मुनीशः प्राशिकश्चेति शशिनायतनेति वा ॥

अर्कमध्यो यदा तु स्यात् तदा स्फुटगतिर्निता ।
चतुर्विंदलनीयत्वात् तोक्तो हारक इष्यते ॥

वाक्यावसानदिवसे चन्द्रभुक्तिः खनिप्रियः ।
विलिप्तायास्तु लिप्ता पष्ट्यंशत्वात्तु ननो हरः ॥
अनन्तपुर इत्येता राशिचक्रस्य लिप्तिकाः ।

End:

युद्धेनेत्यादयो ह्यन्याः क्रान्तिज्याचापलिप्तिकाः ।
त्रिज्याक्षघातलम्बांशेनाहतादिष्टदोर्गुणात् ॥

तत्कोट्याप्तं चरज्या स्याद् ग्राह्या सा क्रान्तिचापतः ।
त्रिज्यावर्गादक्षनिघ्नाद् द्युज्यालब्धां हरेत्पुनः ॥
देवनलब्धा हारज्या सम्भृताक्षप्रदेशजा ।

Colophon:

इति संग्रहसाधनक्रिया समाप्ता ।

Author:

Remarks—Same as No. 607 A.

---

## ॥ जातकसारसंग्रहः ॥

No. 688 D. JĀTAKASĀRASAṄGRAHA.

C. O. L. No. 2431 D.

Substance—Palm leaf. Size—9" × 1½". Leaves—21,

6—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 230. Complete.

Owner—Same as No. 688 A.

Subject—Same as No. 670 A.

Beginning :

हरिः । लग्नाच्चिन्त्यम् ।

तातश्चात्मा प्रभावो द्युमणिरथ मनो-
मातरौ शीतरश्मि-
र्भ्राता सत्त्वं च भौमः क्षितिरपि वचनं
ज्ञानमिन्दोस्तनूजः ।
धीर्वित्पुत्राङ्गसौख्यं सुरगुरुरबला-
भोगयानानि शुक्रो
मृत्युर्व्याधिश्च दुःखं शनिरिह गदितो
दासभृत्यादिकोऽपि ॥

End :

एकग्रहस्य सदृशे पुरवास १२ इत्यादि... ...

.....स्वाधिष्ठितभादुक्तस्थानेषु विन्यसेदक्षम् ।
त्रिभ्यः शोध्यं+निजानिजगुणकैस्तद्युतिः शुद्धपिण्डः ॥

सन्नाहे+क्रियात् शशी हि+सूर्यादपि गुणतः क्रमात् ।
रेखास्तिर्यङ्+२५ । इति निगदितं+त्वष्टसम्पत् ॥

Colophon :

इति जातकसारसंग्रहे षष्ठः खण्डः ।

जातकसारसंग्रहः समाप्तः ।

[illegible]

Author :

Remarks—This Ms. embodies six khaṇḍas. The last twelve FF. seem to deal with Muhūrtas.

---

## ॥ जातकाभरणम् ॥

## No. 689 A. JĀTAKĀBHARAṆAM.

C. O. L. No. 2139 A.

Substance—Palm leaf. Size—$7\frac{1}{8}'' \times 1\frac{3}{8}''$. Leaves—61. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—850.

Owner—Nārāyaṇan Bhaṭṭatiripād, Avanaṅkotukara, Paravūr.

Subject—The reading of horoscopes.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मापुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम् ।
लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स दधातु नैककिरणस्त्रैलोक्यदीपो हरिः ॥

षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं गुहं सदा शरणमहं प्रपद्ये ॥

गुरूणां चरणाम्भोजपरागप्रसराणकः ।
मनोमुकुरमस्माकं पुनीत्वुरनुवासरम् ॥

वराहहोरामालोक्य तथा जातकपद्धतिम् ।
प्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ॥

अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।
यात्रासमये मन्त्री जातकमपहा(य) नास्त्यपरः ॥

End :

नगरयूथपुरोद्भवपूजनं प्रवरयोषिदवाप्तिरथास्ति च ।
विविधवित्तपरिच्छदसंयुतिर्दितिजपूजितदायगते शनौ ॥

तनयसौख्यधनागम...निचयलब्धिरतिप्रभुताशनयाः ।
पवनवित्तमथार्त्तिरथास्ति चेदसुरमन्त्रिदशाहृति चन्द्रजे ॥

तनयसौख्यबहिष्कृतिरग्निजं भयमतीव विनाशनमन्तरुक् ।
अपिच वारवधूजनसंयुतिः शिखिनि यात्यलमौशनसीं दशाम् ॥

Colophon :

इति जातकाभरणेऽष्टमोऽध्यायः ।

या कण्ठनाळकबलीकृतकाळकूट-
च्छायेव विस्फुरति वक्षसि चन्द्रमौलेः ।
सा मे समस्तदुरितानि कटाक्षमाला
तुच्छीकरोतु तुहिनाचलकन्यकायाः ॥

Author :

Remarks—This Ms. extends up to the 9th chapter. The major portion deals with Praśna.

## ।। प्रश्नसारः ।।

## No. 6-9 B. PRASNASĀRA.

C. O. L. No. 2139 B.

Substance—Palm leaf. Size—$7\frac{1}{8}'' \times 1\frac{3}{8}''$. Leaves—60. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 960. Complete.

Owner—Same as No. 689 A.

Subject—Description of the planetary movements.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

സ്കന്ദനഗ്രജനജസ്രമാദരാദിന്ദുശേഖരസുതൻ ഗജാനനൻ ।
മാമകേ മനസി പൂക സാമ്പ്രതം സുന്ദരൻ സകലരാലുമീഡിതൻ ॥
വാണിമാതുമിഹവാനചൂർവ്വമേ വായിൽ നാവിലിതു സത്ര ഭാഷയാ
പ്രശ്നസാരമുപദേശമിന്നു ഞാൻ ചൊല്ലുവതിന്നു സുഖമേതു
നിശ്ചിതം ॥
മാധവീയമിതു ഭാഷ. . . മാധവൻ (വി)രചിതം മനോഹരം ।
മന്നിലില്ലിതു പദ്യഭാഷയാ മുന്നിലെന്നുമറിയേണമേവരും ॥

End:

വൃശ്ചികത്തിലവൻ നിക്കിൽ ജ്ഞാനപ്രദനവൻ ദൃഢം
സർവ്വസംശനിവൃത്ത്യാദിവർജ്ജിപ്പോനെന്നതും ദൃഢം ॥
ഇചയ്ക്കു കന്നി; മിഥുനം ചാക്കതിന്നു ബുധൻ പതി ।
ജ്ഞൊ വചഃയെന്നതീവണ്ണമറി(ര)യണം ന സംശയഃ ॥
ജീവജ്ഞാനസുഖെയെന്ന സിംഹാദഞ്ചൊമിരാശിയുടെ(?)

മീനവും... വൃാഴം ക്ഷേത്രമായിട്ടിരിക്കയാൽ
ജ്ഞാനവും സുഖവും ....നന്നതെന്നു ധരിക്കണം. ||

Colophon :

Author—Mādhava.

Remarks—This poetical piece is in old Malayāḷam.

---

## ॥ प्रश्नमार्गः ॥

### No. 689 C. PRAŚNAMĀRGA.

C. O. L. No. 2139 C.

Substance—Palm leaf. Size—$7\frac{1}{8}'' \times 1\frac{3}{8}''$. Leaves—84. 9—11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1450. Incomplete.

Owner—Same as No. 689 A.

Subject—The principles underlying prognostication.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथाष्टमङ्गलान्युच्यन्ते ।

स्थ.... ....विन्यस्य चिन्तयेत् तत्फलं क्रमात् ।
वामे रुद्रो मध्यभागे ब्रह्मा विष्णुश्च दक्षिणे ॥

प्रष्टुः शरीरसौख्यादिजन्मत्रयमतो वदेत् ।
..... ....अपि वर्त्तमानन्तु मध्यतः ।

दक्षिणस्थेन भावी(नि फलानि च)विनिर्दिशेत् ।
अग्रेमध्योर्ध्वभागेषु वपु(षो दक्षिणादयः) ॥

End :

चिकित्सा तु कृता केन रोगशान्त्यै भ(व ीति? वेदिति) ।
प्रश्नोऽपि रोगशमनप्रश्नवत् स्यात् कर्मात्र शक्तिमत् (?) ।
मृत्युञ्जयगणपतिहोमादीनां कर्तृचिन्तने धिषणः ।
अनुकूलाजलवृद्धी (दश)मगुणश्चास्तु लग्नमूर्ध्वमुखम ॥
एतद्रोगशमन(निरू)पणाविषयम् ।

Colophon:

इति प्रश्नमार्गे पञ्चदशोऽध्यायः ।

शुभमस्तु ।

Author :

Remarks—The Ms. contains 7—15 chapters only.

---

## ॥ जातकोदयः ॥

### No. 690. JATAKODAYA.

C. O. L. No. 283.

Substance—Paper. Size—13¼″ × 8″. Pages — 50. 19 lines per page and 12—16 letters per line. Script—Devanagari No. of Granthas — 450.

Owner—C. O.

Subject—Beginning : Same as No. 883, DOSMMPL.

End :

इति कथितमुडुनामायुरग्न्यादिकानां
फलमपि सदसद्यन्मन्त्रितं चेद् ग्रहाणाम्
युवतिषु फलमेतद् युक्तमप्यत्र वाच्यं
त्रिषु वदति च सर्वं जातिदेशानुरूपम् ॥

द्विजेन केनाप्युडुजातकोदयं
कृतं द्विवेणादिकदेशजन्मना ।
त्रयाधिकश्लोकशतेन निर्मितं
हिताय तज्जातकसारवेदिनाम् ॥

सर्वोक्तं नृपतिविशोः सुदक्षफलमाह विप्रमुख्येषु ।
अन्येषु जन्तुषु गुणाः पुरुषविशेषात् प्रबोद्धव्याः ॥

Colophon :

उडुजातकोदयः समाप्तः ।

Author—A native of Venāḍu.

Remarks—Several leaves are missing in the middle. The work is also known as Uḍujātakodaya,

---

## ॥ जैमिनिसूत्रम् (ज्योतिःप्रदीपिकाख्यव्याख्योपेतम्) ॥

### No. 691. JAIMINISŪTRAM

with the commentary, Jyotipradīpikā.

C. O. L. No. 248.

Substance—Paper. Size—13½" × 8". Pages — 92. 19 lines per page and 10—19 letters per line.

Script—Devanāgarī. No. of Granthas — 700. Incomplete.

Owner—C. O.

Subject—The Sūtras of Jaimini, dealing with the details of astrological science.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीरामाय नमः ।

वन्दे धामनिधिं कलानिधिमतिप्रीत्या गुरुं मङ्गलं
छन्दोगेषु बुधं गुरुं वरकविं मन्दं नमस्यन्ति यम् ।
दैत्यानामनिशं तथाऽगततमोरूपं च केतुं जग-
द्रक्षायै ग्रहरूपशाश्वतमहं वन्दे शुभाकाङ्क्षया ॥

जैमिनीयस्य सूत्रस्य लक्ष्मणाख्यः सुधीरहं ।
ज्योतिःप्रदीपिकां नाम वृत्तिं कुर्वे यथामति ॥

इह खलु श्रीवेदपुरुषस्य नयनभूताङ्गज्योतिश्शास्त्रतत्त्वं भगवता भर्गेण पार्वत्यै उपदिष्टम्। तया स्कन्दाय तेन गर्गाय तत उपदेशं प्राप्तवता कारुणिकेन जैमिनिना लोकानां तत्त्वबोधनाय रचितेषु ज्योतिश्शास्त्रसूत्रेषु उपदेशम् 'उ शिवस्य पदे चरणे स उवन्द' शङ्करतया । शमिति शिवपदाब्जस्मरणमङ्गलपूर्वकं कृतमाद्यमिदं सूत्रम् —

उपदेशं व्याख्यास्यामः ।

उपदिश्यते सकलरहस्यमनेनेति ज्योतिश्शास्त्रं स्वस्मै गर्गकृतोपदेशो वा तं व्याख्यास्यामः प्रकटीकरिष्याम इत्यर्थः ।

End:

ननु अक्षण एव दुर्ज्ञानत्वात् कथं ।
तयाकृष्य नक्षत्र इत्येतमाह—

पितृलाभप्राण्यनुचरविषमस्थो ब्रह्मा ।

पितृलाभयोर्यो बलवान् पार्ष्णो (?) विषमराशिस्थो ग्रहो ब्रह्मा ।

Colophon :

इति तृतीयः पादः ।

इति शूलदशा ।

Author—Lakṣmaṇa.

Remarks—Same as No. 607 A.

## ॥ ज्योतिषप्रकाशनम् ॥

No. 692. JYOTIṢAPRAKĀŚANAM.

C. O. L. No. 719.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9\frac{1}{2}''$. Pages—81. 19 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1134. Complete.

Owner—C. O.

Subject—Explication of the Golādhyāya of Bhāskarācārya.

Beginning :

प्राणः प्रजानां भुवनस्य चक्षुः
कालस्य मूलं ग्रहचक्रनाभिः ।
स ज्योतिषामप्युपजीवनीय-
ज्योतिर्जयत्यम्बरचक्रवर्ती ॥

अथातो भास्करप्रोक्ते गोलाध्यायनिबन्धने ।
ग्रहस्फुटीक्रियाध्यायः प्रस्फुटीक्रियते मया ॥

अथ किल ज्योतिःशास्त्रपारदृश्वा तत्रभवान् भास्करपण्डितः स्फुटीकरणयुक्तिं प्रारिप्समाणः ग्रहगणितपद्धतीनां प्रायो ज्यायत्ततां पश्यन् आदौ तदानयनसम्प्रदायमेव प्रतिपादयिष्यन् उपोद्घन्ति —

पटो यथा तन्तुभिरूर्ध्वतिर्यग्-
रूपैर्निबद्धोऽत्र तथैव गोलः ।

दोः कोटिजीवाभिः —

End :

अथ स्वग्रन्थस्यास्फुटताशङ्कां परिहरन् छेद्यकमुपसंहरति—

ये दर्भगर्भाग्रधियोऽत्र तेषां
स्याच्छेद्यकार्थः परमाणुरूपः ।
येऽन्ये जडाः कुण्ठधियश्च तेषां
स्यादिन्द्रवज्राहतपक्षतुल्यः ॥

उक्तोऽयं छेद्यकव्यवहारस्तीक्ष्णधियां लघुरेव । जडानां तु यदि पर्वतवद् गुरुः स्यात्, सोऽयं नास्माकमपराध इति तात्पर्यम् । इन्द्रवज्रेति वृत्तमुद्रां प्रयुञ्जानः स्वस्य साहित्येऽपि निरङ्कुशं प्रसरमाविष्करोत्याचार्य इति सर्वमवदातम् ।

शुभम् ।

Colophon :

Author—Prof. A. R. Raja Raja Varma, M. A., MRAS, FRHS.

Remarks—Though this work is in the form of a commentary on Bhāskarācārya's Siddhānta Śiromaṇi it is composed on the most up to date lives following as it does the principles laid down by western savants. It is also embellished with many illustrative diagrams to facilitate comprehension.

## ॥ तन्त्ररत्नम् ॥

### No. 693 A. TANTRARATNAM.

C. O. L. No. 2337 A.

Substance—Palm leaf. Size—12″ × 2″. Leaves—11. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—V. Nārāyaṇa Bhaṭṭatiri.

Subject—Same as No. 680.

Beginning :

हरिः । श्रीगणपतये नमः । सूर्यादिसर्वग्रहेभ्यो नमः । अविघ्न-मस्तु ।

यत्तेजःस्फुरणेन दर्शनकला सम्भाव्यते प्राणिनां
यद्वंश्यैः क्षिति...चराचर... विश्वम्भरा पाल्यते ।
यज्ज्ञानात् तिथिवारतारयुतितिथ्यर्धं विनिश्चीयते
भूयास्तां भुवनत्रयीहितकरौ देव... ... ... ॥

नत्वार्केन्दू गोपभूतिप्पराजो
नान्मार्थज्ञो लब्धपूर्त्रं स्फुटं च ।

सिद्धान्ताब्धेरुद्धृतं तन्त्ररत्नं
तात्र... ...य दर्शयिष्ये ॥

शुद्धदिनसङ्क्रमध्रुवरविस्फुटेन्दुध्रुवं सपञ्चाङ्गम् ।
गृहमध्यमं च विरु......भिधीयतेऽध्याये ॥

End :

क्रान्त्योस्समत्वं तु यदैव सिद्धं
तदैव पातस्य हि मध्यकालः ।
ध्रुवस्थिरेन्द्वन्तरभुक्तिकाल-
युतोनितः स ध्रुवकाल एव ॥

पातस्य मध्योऽथ रवीन्दुबिम्ब-
योगार्धतो भुक्तिलवान्तरघ्नः ।
स्थित्यर्धमेतद्युतिहीनपात-
मध्यान्तरं यत् स हि पुण्यकालः ॥

Colophon :

गोपेन्द्रतिप्पभूपालविरचिते तन्त्ररत्ने महाव्यतीपातवैधृत्य-धिकारो नामाष्टमोऽध्यायः ।

Author—Gopendratippa Bhūpala.

Remarks—The Ms. contains only eight chapters.

## ॥ ज्योतिषवाक्यम् ॥

No. 693 B. JYOTIṢAVĀKYAM.

C. O. L. No. 2337 B.

Substance—Palm leaf. Size—12″ × 2″. Leaves—2½.

10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 125.

Owner—Subject: Same as No. 693 A.

Beginning:

श्रीः ।

श्रीर्भूयान्नरस्य । शय्यास्तेन भद्रे ।
हेमाधिकं तान्नृपः । श्रीगौरीत्वदायिका ।
विष्णुस्सेव्योऽयं नरैः । संन्यासी निर्विकारः ।
लक्ष्मीः स्यात् कंसारेः रतिः । धर्मः काले नृपालः ।
सीमन्तिनी वराङ्गी । नृकामो मर्मस्थानभित् ।
विभूतिश्शङ्करभ्रूः । मानमोन्नतिर्नॄणाम् ।

End:

चन्द्रः सलिलानिधिः । ९ । रविराप्रियार्थं युद्धम् । २४० । गानज्ञनटः १ । शोभते बलाढ्यो नृपः । २ । क्षोणीशः श्रीश्वारुनया । ३ । सेनाया नटनोत्कटा । ४ । भवो गौरीष्टप्रापकः । ५ । धन्याक्षी बाला । ६ । कामोरं भूपानाम् । ७ । बलवान् सुखी ८

Colophon:

एतानि वाक्यानि तिप्पभूपालरचितानि । श्रीपतये नमः ।

Author—Same as No. 693 A.

Remarks—A few leaves containing certain sentences beginning with "गीर्नैः श्रेयः" etc. of Vararuci are appended to the close of the Ms.

## ॥ जातककर्मपद्धतिः ( सव्याख्या ) ॥

## No. 693 C. JĀTAKAKARMAPADDHATI with commentary.

C. O. L. No. 2337 C.

Substance—Palm leaf. Size—12″ × 2″. Leaves—24. 10—14 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 900.

Owner—Same as No. 693 A.

Subject—The effects of the planetary position at the time of one's birth.

Beginning :

कमलाभूमिलसत्तनुं हरिं
सरतानेकरविप्रभं मया ।
क्रियते मन्दमतिप्रबोधदा
विवृतिर्जातककर्मपद्धतेः ॥

End :

अथोपसंहरति—

इति जातककर्मपद्धतिं गुरुपादाब्जयुगप्रसादतः ।
इति शिष्यसुखावबोधिनीं कृतवान् श्रीपतिरग्रजाग्रणीः ॥

एवंभूतं जातककर्मपद्धतिमेवं कृतवानिति योजना ।

Colophon :

परमेश्वरनाम्नैवं कृतं जातकपद्धतेः ।
व्याख्यानं शिष्यबोधार्थं भार्गवेण समासतः ॥

इति पारमेश्वरे पद्धतिव्याख्याने अष्टमोऽध्यायः ।

Author—Text : Śrīpati.
Com : Parameśvara.

Remarks—The commentary covers eight chapters. Several leaves are missing in the course of the work.

- -

## ॥ जातिनिर्णयः ॥

### No. 693 D. JĀTINIRṆAYA.

C. O. L. No. 2337 D.

Substance—Palm leaf. Size—12″ × 2″. Leaves—5. 7—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 90. Incomplete.

Owner—Same as No. 693 A.

Subject—Determination of mixed castes.

Beginning :

गणपतये नमः ।

भगवन् सर्वशास्त्रार्थपरिज्ञानवतां वरम् ।
जातिनिर्णयमस्माकं वद वैदिकदर्शितम् ॥

सूतः —
वक्ष्ये लोकोपकाराय जातिनिर्णयमादरात् ।
अगस्त्यं हि पुरापृच्छत् प्रणम्य वृषवाहनः ॥

End :

इत्याकर्ण्य मुनीश्वराः श्रुतिगतं सूतोपदिष्टं परं
सत्यानन्दसुखप्रकाशपरमब्रह्मात्मविज्ञानदम् ।

श्रुत्वा जातिविनिर्णयं सकललोकाम्भोधिपारं मदा
मत्यास्तेयदयायमादिसहितास्तुष्टा बभूवुर्भृशम् ॥

Colophon :

इति स्कान्दपुराणे द्वादशोऽध्यायः ।

Author—Vedavyāsa.

Remarks—Only the 12th chapter is extant in this Ms. The work is a portion of the Skāndapurāṇa. The last Fol. contains the following line:

क्षेत्रस्थे राशिगुणतारः । नेता अधिमित्रभे हेला ।

---

## ॥ तन्त्रसंग्रहः (लघुविवृतियुतः) ॥

No. 694. TANTRASAṄGRAHA
with the commentary, Laghuvivṛti.

C. O. L. No. 524.

Substance—Palm leaf. Size—13″ × 1¾″. Leaves—106. 8 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—2300. Complete.

Owner—Nārāyaṇan Rāman Piṣārodi, Kidaṅgur.

Subject—Same as No. 693 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रत्यूहव्यूहविरतिकारकं परमं महः ।
अन्तःकरणशुद्धिं मे विदधातु सनातनम् ॥

यत्प्रसादात् कवीन्द्रत्वं मन्दोऽपि लभते क्षणात् ।
तां शारदेन्दुस्वच्छाङ्गीं वन्दे देवीं सरस्वतीम् ॥

नारायणं जगदनुग्रहजागरूकं
श्रीनीलकण्ठमपि सर्वमिदं प्रणम्य ।
यत्तन्त्रसंग्रहगतं ग्रहतन्त्रजातं
तस्यापरां च विवृतिं विलिखामि लघ्वीम् ॥

तत्रादौ तावदाचार्यः प्रारिप्सितप्रबन्धप्रत्यूहशमनाय अभीष्टदेवतां नमस्करोति —

हे विष्णो! निहितं कृत्स्नं
जगत्त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै
नमो नारायणाय ते ॥ इति ॥

End :

अत्र लक्ष्मीशनिहितध्यानैरित्यक्षरसंख्यया समाप्तिसमयाहर्गणश्च दर्शित इति सर्वमवदातम् ।

Colophon :

इति तन्त्रसंग्रहस्य क्रियाकलापं क्रमेण संगृह्य ।
रचिते तद्व्याख्याने पूर्णोऽभूदष्टमोऽध्यायः ॥

समाप्तं चेदम् ।
नमः शिवाय ।

ഈ വ്യാഖ്യാനം തൃക്കുടവേലിച്ചങ്കരവാരിയരൊട്ടുകൂടി ചമച്ചതു്. അതഴാം ചൊരിക്ക വേണ്ടീട്ടു സുഖമേ ശിക്ഷിച്ചു ചമച്ചു. എന്നു പാറങ്ങോട്ടു പറഞ്ഞു കേട്ടു.

Author—Text: Nīlakaṇṭha.

Remarks—Both the text and the commentary are arranged here in juxtaposition to each other. The chronogram लक्ष्मीशनिहितध्यानैः discloses that the author flourished in the 7th century M. E.

---

## ॥ तन्त्रसंग्रहः (सव्याख्यः) ॥

### No. 695 A. TANTRASAṄGRAHA with commentary.

C. O. L. No. 134 A.

Substance—Palm leaf. Size—$17\frac{1}{4}'' \times 2''$. Leaves—70. 10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Owner—Kṛṣṇan Keśavan, Perināḍ, Quilon.

Subject etc.—Same as No. 694.

---

## ॥ सारसंग्रहः ॥

### No. 695 B. SĀRASAṄGRAHA.

C. O. L. No. 134 B.

Substance—Palm leaf. Size—$17\frac{1}{4}'' \times 2''$. Leaves—6. 9 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Owner—Same as No. 695 A.

Subject—Same as No. 680.

Beginning:

हरिः । श्रीगणपतये नमः ।

छायाजलयन्त्राद्यैरवगम्य द्युगननाडिकाः प्रश्ने ।
सावयवास्ताभिरयं प्राग्लग्नविधिर्निगद्यते स्पष्टम् ॥

तुलामेषादितः स्वर्णं चरं सायनभास्करे ।
युग्मौजपदयोः स्वर्णं कृत्वा प्राणकलान्तरम् ॥

योज्याः षड्गुणनाड्योंऽशाः काललग्नं तदुच्यते ।
तस्मात् पृथक्स्थितात् प्रासे चरप्राणकलान्तरे ॥

विपर्ययेण संस्कुर्यात् तस्मिन्नेवावशेषिते ।

End:

"सूर्यात्सूर्यं विलोमत" इत्युक्तत्वात् सूर्यस्फुटाद् धनात्मकं यामफलं विशोधयेत् । ऋणात्मकं योजयेत् । तदा सूर्यस्फुटं भवति इति । गुळिकस्थभग इत्यादौ यामसंख्येत्यत्र च ग्रहस्य यो राशिरागच्छति, तस्मिन् तत्त्रिकोणराशौ च स्थितो ग्रहो मृत्युदो भवति । एवं त्रिकोणराशिः सर्वत्र चिन्त्यः । अस्मिन् ग्रहप्रातिकूल्यनिरूपणे चक्रोडुदशयोः प्रातिकूल्यमपि प्रथमतो निरूपणीयम् ।

Colophon:

इति सारसंग्रहे नवमोऽध्यायः ।

हरिहरविधिभ्यो नमः । गुरुभ्यो नमः ।

Author:

Remarks—The Ms. comprises 9 chapters. Its beginning and end are missing.

## ॥ सन्तानदीपिका ॥

### No. 695 C. SANTĀNADĪPIKĀ.

C. O. L. No. 134 C.

Substance—Palm leaf. Size—17½″ × 2″. Leaves—4. 9 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas — 125.

Owner—Same as No. 695 A.

Subject etc.—Same as No. 968. D. SMMPL.

---

## ॥ तन्त्रसंग्रहः (लघुविवृतियुतः) ॥

### No. 696. TANTRASAṄGRAHA
with the commentary, Laghuvivṛti.

C. O. L. No. 994.

Substance—Palm leaf. Size—11½″ × 1½″. Leaves—153. 7—10 lines per page and 34—40 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Tuppan Tuppan Nambūri, Punnorkoṭṭu Manakkal.

Subject etc.—Same as No. 694.

Remarks—No continuity is observable after Fol. 120.

---

## ॥ तन्त्रसंग्रहः (लघुविवृतियुतः) ॥

### No. 697 A. TANTRASAṄGRAHA
with the commentary, Laghuvivṛti.

C. O. L. No. 809 A.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—132. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Kṛṣṇa Vāriar, Vaḍakketteruvu Tiruvārpu.

Subject etc.—Same as No. 694.

---

## ॥ करणोत्तमम् (सव्याख्यम्) ॥

### No. 697 B. KARAṆOTTAMAM.

C. O. L. No. 809 B.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—34. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—654½. Complete.

Owner—Same as No. 697 A.

Subject—The movement of the planets.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरूणां चरणाम्भोजपरागपरमाणवः ।
मनोमुकुरमस्माकं पुनन्त्वनुवासरम् ॥

